॥ श्रीः ॥

पुराणसमीक्षायां—देवयुगाभासे

* पदनिरुक्तम् *

समीक्षाचक्रवर्ति-महामहोपदेशक-विद्यावाचस्पति
विद्वद्वर्य स्व० पं० श्रीमधुसूदनजी ओझा
विरचितम् ।

तदिदं
स्वामी सुरजनदास एम० ए०
साहित्य, व्याकरण, सांख्ययोगाचार्येण
सम्पादितम् ।

ग्रन्थकर्तृसूनुना पं० श्रीप्रद्युम्नशर्म्मणा
प्रकाशितम् ।

प्रथमावृत्तिः] वि० सं० २००६ [मूल्यम् १।)

सर्वेऽधिकाराः प्रकाशकाधीनाः ।

पद्म - आत्मा वै पद्म् । कौ. २३.६
पशव: पद्मम् । मै ३.८.१४ २४।४।६ क ३८।८
स यदेकानिंशकपाली शतमानो वाहि तत्पद्मम्
पद्मम् । ऐ आ. २.२.२.

पुनःपद्म् - प्राणा: पुनःपद्मम् । कौ. २३।६

न वा एवंविदेकेन पद्मेनाचय इष्यते । वा यजु १।८२

पदमङ्गौ शब्दे माणे व्यवसायप्रदेशयोः । ३१३१
। द्वितेऽङ्घ्रिद्वितेऽङ्घ्रिभ्यां पद्यमाभेऽङ्घ्रयस्त्रयः ।
स्थाने वाक्ये ध्रुवेऽङ्घ्रिः स्तेमाने पञ्चदशाऽङ्घ्रयो ।३१३२.
इन्द्रपुच्छेऽनिर्दशाऽप्यादित्यस्थेषु साम्मेषु ।



वेदविद्योद्धारक स्वर्गीय गुरुवर्य पं० श्री मधुसूदनजी ओझा ने सहस्राब्दों से विलुप्त वेदविद्या का पुनरुद्धार करने के लिये जिस प्रकार वैदिक रहस्यों के उद्घाटनपरक वैदिकपरिभाषाओं के अनेकों ग्रन्थों का निर्माण किया उसी तरह वेदाङ्गविषयक ग्रन्थों की भी रचना की। प्रस्तुत पुस्तक इसी वेदाङ्गविभाग के अन्तर्गत है। इसमें जिन विषयों का निरूपण किया है उनका सामान्यतया नीचे तालिकारूप में पाठकों की जानकारी के लिये दिग्दर्शन किया जा रहा है।

१—पदशब्द की व्याख्या तथा नाम, आख्यात, उपसर्ग व निपात भेद से पद के चार विभागों का निरूपण।

२—"चतुष्टयी वै शब्दानां प्रवृत्तिः जातिशब्दो गुणशब्दः क्रिया-शब्दो यदृच्छाशब्दश्चेति" इस महाभाष्यकारीय वचन के अनुसार शब्दों की चार प्रकार की प्रवृत्ति का विशद विश्लेषण व विवेचन करते हुए यदृच्छाशब्द का निराकरण एवं शब्दों की चार प्रकार की प्रवृत्ति का प्रतिक्षेप।

३—क्रिया शब्दों के भी धातु, विभक्ति, विकरण व आगमभेद से

क्रमि च नाम च रूपं, रूपं वर्णा: लिंगलिंगा इत्यर्थ:, आकृतिसंस्थारूपं हूपं तत्समाच्चतुर्विधं भवति | विग्रा ४४/७०
अंडजानां चेदेजा मत्स्यानां चस्तु स्मात्ते मूलाजि, वाग्वेव नाम तत्सत्यमाख्येत्तच्छ्रुतं सर्वम् ॥ ७१
तमूलजाकारां वै तदनेदाद व्याकेऽच्यते नामा, इदं वाग्रूपनमाति प्रत्यर्थं सारतेसमक्षे | ७२
नामाकृतिः द्रव्यः जातेरुच्यते तेन नामनोऽत्यं, इटं सम्बन्धविशेषं मन्ये न तुल्यहि कंपनमात्रम् ॥ ७३ ॥

होता है, यह सूत्र का अर्थ किया है। भक्त जहां भवका दर्शन करते हैं वहां साक्षात्कारक्रिया में भक्त व भव दोनों प्रयोजक हैं। भव के साक्षात्कारविषय होने में भक्त प्रयोजक पड़ते हैं एवं भक्तोंके भवविषयक साक्षात्कारकरण कर्म में भव प्रयोजक पड़ता है, क्यों कि यदि भव नहीं होता तो भक्त किस का साक्षात्कार करते। इस तरह एक साक्षात्काररूप कार्य में दोनों को प्रयोजकता है। जब इस क्रिया में भक्तों के प्रयोजकत्व की विवक्षा होती है तब भक्तों में क्रियाकर्तृत्व की विवक्षा होने से "भक्ता भवं पश्यन्ति" यह प्रयोग होता है और जब भव के प्रयोजकत्व की विवक्षा करते हैं तब भव में कर्तृत्व होने से "दर्शयते भवो भक्तान्" यह प्रयोग बन जाता है। इस तरह दोनों प्रकार के प्रयोग होते हैं किन्तु दूसरे प्रयोग में अण्यन्तावस्था का कर्म ण्यन्तावस्था का कर्ता बन गया है अतः वहां आत्मनेपद हो जाता है और पहिले में नहीं।

गुरुवर्य के साधारण से साधारण ग्रन्थ में भी एक विलक्षण विचारशैली, मौलिकता व अपूर्वता रहती है। जैसा कि ऊपर के उदाहरण से स्पष्ट है। इस छोटी-सी पदनिर्वचनपरक पुस्तक में भी कितनी ही मौलिकताएं हैं जिनका दिग्दर्शन इसके अध्ययन करने से ही मालूम पड़ सकता है। भूमिका केवल दो-तीन पेज की ही बनी है अतः उन विषयों का दिग्दर्शन इसमें नहीं किया जा सकता। केवल एक उदाहरण ऊपर दिया है उससे उपर्युक्त कथन की सत्यता पाठकों को भली भांति विदित होजाती है।

चार भेद बतला कर धात्वर्थ व विभक्तिशब्दार्थ का निरूपण।

४—क्रियासम्बन्ध व नामसम्बन्ध से विभक्तियों को द्विधा विभक्त कर क्रियासम्बन्ध से विभक्ति का भाव, कर्ता व कर्म भेद से तीन विभागों में तथा नामसम्बन्ध से विभक्ति का सम्बुद्धि प्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी व सप्तमी भेद से आठ भागों में विभाजन।

५—धात्वर्थ का अकर्मक व सकर्मक व्यवस्था का निरूपण।

६—प्रत्येक कारकों के पृथक् पृथक् लक्षण का निर्वचन।

७—कर्ता, कर्म, कर्मकर्ता व भावभेद से चार प्रकार के आख्यात प्रयोगों का उदाहरण व कारणसहित दिग्दर्शन।

८—"णेरणौ यत्कर्मणि चेत्सकर्ताऽनाध्याने" इस सूत्र के उदाहरण-भूत दर्शयते भवान्, इस उदाहरण को लेकर कैयट, दीक्षित तथा नागेश के मतों का प्रदर्शन तथा उनकी आलोचना।


९—अन्तमें इन तीनों मतों में दोष बतलाकर उपर्युक्त सूत्र के विषय में अपने मत का प्रदर्शन। स्वमतानुसार सूत्र में कर्म को क्रियापरक मानते हुए भी पारिभाषिक नहीं माना है किन्तु सामान्यक्रियापरक अर्थात् कार्यपरक माना है। अर्थात् जहां एकतावस्था व अनेकतावस्था में एक ही कर्म हो वहां अनेक-तावस्था के कर्म की कर्ता होजाने पर धातु से आत्मनेपद

व्याकरण के विद्वानों को इस ग्रन्थ का अध्ययन अवश्य करना चाहिये जिससे इस ग्रन्थ की उपादेयता मालूम हो सके।

दौर्भाग्यवश यह ग्रन्थ भी अपूर्ण है पर जितना है वह भी पाठकों के लिये पर्याप्त सामग्री उपस्थित करता है। अतः विज्ञ विद्वानों को इसे एकबार अवश्य देखना चाहिये।

सुरजनदास स्वामी
श्री दादूमहाविद्यालयः
मोतीडूंगरी,
जयपुर
ता० ११-६-५२

पदम् - (१) वर्णः
(२) वर्णसमुदायः
(३) चरणम्
(४) चरणाभिलम्
(५) स्थानम्
(६) विषयः
(७) उपाधिः
(८) शरः
(९) आयम्
(१०) व्यवसायः
(११) अवदेशः
(१२) चरणन्यासः
(१३) पदचिह्नम्
(१४) अंशुः
(१५) वस्तु
(१६) नाटकम्
(१७) पञ्चदशांशुभागमेम्



'अर्थः पदम्' इत्यैन्द्राणाम् । जैनेन्द्रव्याकरणे १।३
न - न वा ज्ञानार्णव ३०२ (त्रैलोक्यम् ३।१) डाक्टरेट

--:❀ पदनिरुक्तम् ❀:--

पदशब्दार्थः

समाम्नायः समाम्नातः। स द्वेधा वर्णसमाम्नायः पदसमाम्नायश्च। तत्रादौ वर्णसमाम्नायः प्रदर्शितश्च व्याकृतश्च [1]निरुक्तश्च। ततः पुनरयं पदसमाम्नायोऽपि प्रदर्शितश्च व्याकृतश्च। [2]अथेदानीं स निर्वक्तव्य इत्युपक्रम्यते। तत्र पदं तावदर्थबुबोधयिषया अर्थविशेषे सङ्केतितो वर्णो [3]वर्णसमुदायो वा। अत्र हि गतिः पदेरर्थः। यदेवास्थाय एकत्र सन्नन्यत्र गच्छति, तत् पदम्। यथा हि चरणमास्थायात्मा देशान्तरं गच्छतीति चरणं पदम्। भूयिष्ठं चरणचिह्नमेवास्थाय कुशली मृगं चौरं वा गच्छतीति चरणचिह्नं पदम्। एकं परिगृहीतं स्थानमास्थाय गन्ता गम्यं गच्छतीति स्थानं पदम्। कञ्चिदधिकारं वाधिकारधिष्ण्यं वास्थायाधिकृतः

१--शिक्षानामके वेदाङ्गे स्वीयायां वर्णसमीक्षायां च।
२—कोशे व्याकरणे च। लेखकस्यापि वैदिककोशो व्याकरणं च पृथग्भूतम्।
३—क्वचिदेकवर्ण एव पदं भवति— अः इः इत्यादिः। तदभिप्रायेणेदमुक्तम्।

पदगतौ (१०.६१) पदगतौ (१०.२८१) पदक्षये, पदक्षयेर्थे (१०.४२)

'जानेमेनाकालैं प्रादुर्भावेसाक्षियतेस्वयं' इतिन्यायेनैकवाट: आकृष्यतेनिरूप्यते । शारद्वा. १/६७ब्द

) अर्थ: पदम् (च) पुनर्नपुंसि (च) निपातोपग्रहे (च) नाधि पञ्च (ऽ) षड् वा, चंआरागमे वर्ज्यपञ्चन्शब्
भेदे नेति षट् पदानुक्रमदर्शिनी: १।८

नामार्थानुपयोगी निपातः इत्यन्वर्थः पदजरत्नानि शब्दरः । शब्दप्रकाशे. १२/१८

नावोऽव्यवहितेचर आदौ जगतिश्चव्यतीहारे । लमिर्गर्वैरःसेमित्यौके आवश्यत्वं प्रकाशते । अमरकोषे ६८ ३७
पृथक् पृथगभिव्यक्ता अवश्योव्यक्तये: परायेत् । तासु सर्वासु कार्यकं निमन्त्रणं निवेदनम् ॥ ३६२

सुमेकः - सुमेकः संज्ञायां स्वेको ह वै नामैतद् यत्सुमेकः इति/१.८.२२ मान

प्रदेश उपदेशोऽदेशः प्रदेशवाचेषु । ३६८२.
जातिः प्रत्यायेतव्यैः प्रदेशेषूपदिश्यते । का.वृ.दी २·६५
कारणत्वाच्च प्रदेशशब्देनाभिधानात् । को.भू.२/२।५८(७७)

क्रियां वा क्षमतां वा गच्छतीत्यधिकारो वा विषयं वा पदम् । तं तमुपाधिमाम्नाय परस्तत्प्राप्यतां गच्छतीत्युपाधिः पदम् । एवमेव कृतसमयं वर्णसमुदायमाम्नाय विपर्यीकृतसमया बुद्धिरर्थविशेष गच्छतीति स वर्णो वर्णसमुदयो वा पदम् ।

पदस्य चतस्रो विधाः

तस्य चातुर्विध्यं भगवान् वेदपुरुषः प्राह—

चत्वारि वाक् परिमिता पदानि तानि विदुर्ब्राह्मणा ये मनीषिणः । गुहा त्रीणि निहिता नेङ्गयन्ति तुरीयं वाचो मनुष्या वदन्ति. इति ।

इत्यत्र तानि पदजातानि चतुर्धा विभक्तानि भवन्ति नामाख्याते चोपसर्गनिपाताश्चेति ।

अपर आह जातिशब्दो गुणशब्दः क्रियाशब्दो यदृच्छाशब्दश्चेत्येवं चतुष्टयी शब्दानां प्रवृत्तिः । भवन्ति हि घटः पटः पशुः पक्षी इत्येवमादयो जातिशब्दाः । स्थूलः कृशः शीघ्रो मन्द इत्यादयो गुणशब्दाः । पाचकः पाचकः पचते पठति इत्यादयः क्रियाशब्दाः । डित्थः कपित्थः सुमेक इत्यादयो यदृच्छाशब्दा इति ।

यदृच्छाशब्दखण्डनम्

[illegible] तदेतन्न रोचते निरुक्तवेदिनः । न ते तावत् पश्यन्ति यदृच्छाशब्दान्, येषु प्रकृतिप्रत्ययविभागेनार्थप्रत्ययो नास्तीति ।

सन्ति वा सर्वत्रैव यदृच्छाशब्दाः-धातुकृत्प्रत्ययरूपाः । तत्तदर्थेषु तेषामेकैकेषां प्रकृतिप्रत्ययविभागमपेक्ष्यैव समयग्रहणात् । न केवलमर्थवान् प्रकृतिनिमित्तमनपेक्ष्य व्यक्तिविशेषे प्रयुज्यमानः शब्द एवासौ यदृच्छाशब्दः किन्तर्हि योपि स्वगत प्रादेशिकत्वमनपेक्ष्यैवार्थविशेषे नियुक्तः सोऽपि यदृच्छाशब्दो भवितुमर्हति । तथा च धातवः सन्ति प्रत्ययाश्च । तस्मादिमे यदृच्छाशब्दाः । ततश्च सार्वत्रिकोयं यदृच्छाशब्दः संसिध्यति । इमे यदृच्छाशब्दा इमे गुणशब्दा इति तु विभागो नावकल्पते । यथा हि भवान् डित्थशब्दमप्रादेशिकेन गुणेनान्वितं प्रतिपद्यते, तथैव पुनः शुक्लशब्देऽपि शुक्शब्दं लशब्दं च पश्यामः । नचैव शुक्लशब्दे शुक्शब्दो लशब्दश्चावश्यमप्रादेशिकेन गुणेनान्वितौ भवेताम्, शुक्लशब्दस्तु भवति प्रादेशिक एव नत्वेवं डित्थशब्दं पश्यामीति शुक्लशब्दापेक्षया डित्थादयः शब्दा यदृच्छाशब्दतया विभज्यन्ते इति चेन्नैतन्निपुणं पश्यसि । भवेदेवं यदि डित्थादिषु शब्देषु प्रदेशा न स्युः, पश्यन्ति चेहापि प्रकृतिप्रत्ययविभागं निर्वाचका. । 'नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधः स भवति' निर्वचनविद्यया तु सम्यगभिज्ञातया तदर्शने कृतप्रयत्नः फलवान् भवति । तस्मान्नैवं जातिगुणक्रियाशब्दविभागापेक्षया यदृच्छाशब्दोऽतिरिच्य निरुच्यते ।

चातुर्विध्यप्रतिक्षेपः

अथैव जातिगुणक्रियाभिर्विभागोऽपि नावकल्पते, द्रव्यशब्दानामसम्भवात् । न भवति हि दण्डीत्येवमादीनां शब्दानां

तेष्वन्तर्भाव इति तदर्थं द्रव्यशब्दानामपि संग्रहौचित्यं प्रसज्यते । अथ यदि मन्यसे-तत्र प्रकारतया गृहीता घटदण्डादयो गुणभूता एवेति गुणशब्दा एते भवन्तीति, तत्तर्हि जातिक्रियाशब्दयोरपि गुणशब्देऽन्तर्भावसम्भवात्पार्थक्येनोल्लेखानौचित्यं प्राप्नोति । यदि वा पञ्चधा विभागः स्वीकरिष्यते, तथापि न निस्तारः, जडमूकान्धबधिरोन्मत्तादीनां च शब्दानाम्, तथा द्योतकानां चतुर्वाहादीनामनर्थकानां कर्मीमिश्रादीनां वा तथाप्यसङ्ग्रहात्। अपि च घटकारचक्रधरदण्ड्यादिशब्दानां द्रव्यशब्दत्वक्रियाशब्दत्वाभ्याम्, कर्तृकर्मकरणकारकादिशब्दानां जातिशब्दत्वक्रियाशब्दत्वाभ्यां च निह्नुतिरिणसम्भवि । शुक्लकृष्णादिशब्दानां द्रव्यशब्दत्वगुणशब्दत्वजातिशब्दत्वक्रियाशब्दत्वेभ्यो व्यामिश्रप्रतिपत्तिकेभ्यो नूनमनिर्णयः प्राप्नोति । प्रयुज्यते हि शुक्लगुणयुक्तकर्मविशिष्टे गवि शुक्लशब्दः-शुक्ला गौरिति, तत्रेदं विप्रतिपन्नमिव-किमयं शुक्लद्रव्यसंयोगाच्छुक्ल आहोस्वित शुक्लगुणसंश्रयात् । अस्त्येव अवयवे कृते लिङ्गं समुदायस्य विशेषकं भवति । तद्यथा-गोः सक्थनि कर्णे वा कृतं लिङ्गं समुदायस्य विशेषकं भवतीति । तदयं चर्मविशेषको गुणः शुक्लो गौरपि विशेषको भवतीति गुणशब्दः सः । अथवा जातिशब्दो भवेत्, आचक्षते हि गुणसमुदायो द्रव्यमिति । समुदायश्चावयवातिरिक्त इष्यते, आतश्च प्रयुज्यते—

अकृशं कुचयोः कृशं विलग्ने विपुलं वक्षसि विस्तृतं नितम्बे ।
त्रिवलीवलितेषु विद्धि कण्ठ्यादि कलत्रिमागधेयम् ॥

तदयं चर्मावच्छेदेनावस्थितः शुक्लो गुणोपि गोशब्दप्रवृत्तिनिमित्तगुणसमवायं गौर्भवति । न चैतावता अनेके गाव इति बहुवचनमापाद्यम्, समुदायापेक्षित्वाद्विभक्तीनाम् । तथा चाहुर्भाष्यकाराः "बहुषु बहुवचनम्" इति सूत्रे भाष्ये—

केषु—बहुषु अर्थेषु । यद्येवं वृक्षः प्लक्षः अत्रापि प्राप्नोति । बहवस्तेऽर्था मूलं स्कन्धः फलं पलाशमिति ।

अन्तरेणापि भावप्रत्ययं गुणप्रधानो भवति निर्देशः, न चेह वयमेकत्वादिभिः कर्मादीन् विशेषयिष्यामः, किन्तर्हि कर्मादिभिरेकत्वादीन् विशेषयिष्यामः-केषां बहुषु—कर्मणामिति ।

द्विविधश्च समुदायः प्रतिपद्यते तिरोहितावयवश्चोद्भूतावयवश्च । तत्रेदमुक्तं तिरोहितावयवत्वे समुदायस्यैकत्वादेकत्वम् । यत्रोद्भूतावयवत्वं विवक्ष्यते तत्रावश्यमेकस्मिन्नेव तु बहुवचनं पश्यामः 'वयं तु ब्रूमः खलु' 'ब्राह्मणाः सर्वथा पूज्या भवन्ति' इत्येकामपि व्यक्तिमुद्दिश्यैवमाह । तत्र यदि नाम द्रव्यं गुणेभ्योऽतिरिक्तः पदार्थः स्यात्, तत्तर्हीदमेकस्मिन् बहुवचनमुच्यमानमनुपपद्यमानं स्यात् । तस्माद् गुणा एव द्रव्यमिति । तत्र कतिपयगुणसमवाये शुक्लगुणोप्येवं गौर्भवति, तथा च शुक्लगुणप्रधाने गोर्व्यपदेशे शुक्लो गौरित्यत्र शुक्लस्य गुणत्वव्याप्यधर्मावच्छिन्नस्यैव प्रवेशाज्जातिशब्दोऽयम् । अथवा नत्वेव शुक्लत्वं नामातिरिक्तः कश्चन जातिपदार्थः-ऋते सर्वशुक्लसामान्याच्छुक्लोपादानकर्मणः । शुक्लं च

1 रुद्रस्य अष्टमूर्तयः स्मरन्ति । ॐ । ३ । ४ । १० । शुक्लवर्णः । ॐ ३ । ४ । १० । ५

2 ये नैमित्तिकाः शब्दादसे निमित्तमुपादाय प्रवृत्तास्ते यावत् दृष्टो भवति । इमौ चतुष्पदावत् क्रियाभाक्तृभेदेन प्रवृत्तत्वेते नपुंसकेन क्रियाभिधेनाभिहिते । यत्तत् (यं वायुरोध सूत्रेण । ७ । ३ । २६) अधोऽधोऽत्र । अरुंतुदा क्रियाभेदमात्रं तत्रः शब्दप्रयोगः । अत्र प्रश्नः - पुरुषाणामाकृतिं निमित्तेन व्यवस्थानां सुलभत्वात्, अदृष्टानां क्रियाणां निमित्तव्यवस्थानाभावं तेषां संज्ञानं यत्नेन क्रियाभेदेन प्रवृत्तिदर्शनादिति । अत्रोच्यते: पाक्ष क्रियाया आकारैक्यमात्रेण क्रियायामैक्यमुपयाते, यतः क्रियाभेदकाले शब्दप्रयोगः । तथादर्शनं निमित्तं । यदेवं तदत्र लिङ्गं दृष्टं देवस्य । कुतः अदृष्टस्य ज्ञानाभावात् । ज्ञाता क्रिया शेषस्य क्रियाकाचेन: शब्दस्याभावात् ।

शुद्धिक्रिया दृष्टुरुचित्तप्रसादनरूपा। तथा च क्रियाप्रवृत्तिनिमित्तकः शुक्लादिशब्दः क्रियाशब्दो भवितुमर्हति। तदित्थमसंप्रत्ययः—कुत्र खल्वेते ग्रहीतव्या इति, द्रव्यगुणकर्मजातीनां वा को विशेष इति। तस्मादनवक्लृप्ता नूनमियं विभक्तिश्च प्रक्लृप्तिश्च। आतरचेयमनवक्लृप्ता विभक्तिः—यदि नाम द्रव्यगुणकर्माद्यर्थविभक्तिसापेक्षा सेयं शब्दविभक्तिरभिप्रेयते, तत्तर्हि सप्तधा विभागः प्राप्नोति। सप्तधा हि विभज्यार्थान् व्याचक्षते वैशेषिकाः—द्रव्यं, गुणः, कर्म, सामान्यं, विशेषः, समवायः, अभावश्चेति। तदनुरोधेन च सप्तधैव शब्दान् पश्याम.—द्रव्यशब्दं गुणशब्दं क्रियाशब्दं जातिशब्दं यदृच्छाशब्दं सम्बन्धिशब्दमभावशब्दं च। दण्डी, चक्री, वृषाङ्कः, नीलाङ्कः इत्यादयो द्रव्यशब्दाः। ह्रस्वः, दीर्घः, कृशः, स्थूल इत्यादयो गुणशब्दाः। लेखकः, पाठकः, सभासत्, सर्वविदित्यादयः क्रियाशब्दाः। घटः, पटः, गौर इत्यादयो जातिशब्दाः। डित्थः, किल्विलः, इटिविटिः, पैल इत्यादयो यदृच्छाशब्दाः। माता, भगिनी, दुहिता, पिता, भ्राता, पुत्र इत्यादयः सम्बन्धिशब्दाः। अन्यः, शून्यम्, विकलम्, विना इत्यादयश्चाभावशब्दाः। तत्र यदि चतस्रः पञ्च वा विधा अपेक्ष्यन्ते, किमपराद्धं तत्तर्हि तदितराभिर्विधाभिः। अथोच्यते—अभावशब्दा लोपखर्जनादिक्रियाशब्देष्वभिनिवेक्ष्यन्ते, सम्बन्धिशब्दाश्च जननादिक्रियाशब्देषु इति, तत्तर्हि यदृच्छाशब्दा अपि शब्दास्त्यगुणपुरस्कारेणार्थाभिधायिनः गुणशब्देष्वन्तर्भाव्यन्ताम्।

यदृच्छाशब्दनिराकरणम्

अन्यत्येदं जिज्ञास्यते। अवयवार्थमनपेक्षमाणोऽयं यदृच्छाशब्दः एकव्यक्तिपरत्वेन एव यदृच्छाशब्दत्वं गृह्णाति, आहोस्विदनेकव्यक्तिपरत्वेऽपि?

किञ्चातः—यद्यनेकव्यक्तिपरत्वेऽपीति पक्षः आस्थीयते, तत्तर्हि त्सरुतिथिसुमेकादीनामिव गोमहिषाश्वाङ्कमेलकादिशब्दानां मेचककडारस्थूलवामादिशब्दानां चाप्यवयवार्थमनपेक्षमाणानां यदृच्छाशब्दत्वप्रसक्तौ तत्पर्यायाभिधायिनामपि तत्त्वमर्थादापन्नं स्यादिति जातिगुणविभागानावश्यकत्वं प्राप्नोति।

अथ यद्येकव्यक्तिमात्रपरत्वमवसीयते यदृच्छाशब्दस्य, तत्तर्हि तिथिसुमेकादीनामुपसंग्रहायान्यो विभागः परिकल्प्यो भवति। अथ यद्यनेकव्यक्तिषु समयग्रहणादिमे तिथिसुमेकादयोऽपि जातिशब्दा एवेति नातिरिक्तकल्पनावश्यकना—इति पश्यसि, तत्तर्हि डित्थकिल्विलादयोऽप्यनेकव्यक्तिनिष्ठा एवेति जातिशब्दा एव भवेयुः, अनवकाशं च यदृच्छाशब्दत्वं स्यात्।

अतिरिक्तजातिवादखण्डनम्

तथा हि—शब्दः खल्वपि सर्वेषामर्थजातानां विशेषको भवतीति विशेषप्रतिसन्धानाय प्रवर्तते, विशेषश्चात्र तत्तद्बुद्धिविषयतावच्छेदकत्वोपलक्षितो नानार्थसमुदायनिष्ठः। यथा अस्त्येव सास्ना-

लाङ्गूलककुदखुरविषाणादिभिरर्थसमुदायैः कृतावयवे समुदाये कश्चिद्विशेषः, येनैषा गोव्यक्तिरितराभ्यः पृथक्कृत्यानुभाव्यते, एवमेवास्त्येव तैरपि समुदायैः कृतावयवेऽपरस्मिन् समुदायेऽपरो विशेषः, येनैषा गोजातिरितराभ्यः पृथक्कृत्यानुभाव्यते, एवमेव तेनापि समुदायेनान्यैश्च समुदायैः कृतावयवेऽपरस्मिन् समुदायेऽपरो विशेषो वर्तते, येनैषा पशुजातिरितराभ्यः पृथक्कृत्यानुभाव्यते। एवमेवान्यत्रापि द्रष्टव्यम्। तत्र यः पशुजातिव्यवच्छेदकः समुदायनिष्ठो विशेषः, तदवच्छिन्ने समुदाये पशुशब्दः कृतसङ्केतः। [१]एकबुद्ध्या गृहीता अवयवाः समुदायः—इत्यवयवानतिरिक्तः समुदायो भवति। अत एव समुदाये दृष्टाः शब्दा अवयवेऽपि वर्तन्ते—पूर्वे पञ्चाला., उत्तरे पञ्चालाः—इति यथा. एवमिहापि समुदाये सङ्केतितः पशुशब्दोऽवयवेष्वपि वर्तते—इति गोजातिः पशुः, गावः पशवः, इयं च गौः पशुः तदवयवः सास्नादिरपि पशुरेव न देवो न मनुष्यो न पक्षी न सरीसृपो नापि वा स्थावरो भवितुमर्हति। सास्नाग्रहणेऽप्याचक्षते—पशुमग्रहिषमिति। तथा चाह अवयवे कृतं लिङ्गं समुदायस्य विशेषकं भवतीति। यथा गोः सक्थिन कर्णे वा कृतं लिङ्गं समुदायविशेषकं भवतीति, तदप्यत एवोपपन्नं द्रष्टव्यम्। यदि नाम गोकर्णे गोशब्दो नाभविष्यद्, अवश्यं तत्तर्हि गोकर्णे कृतं लिङ्गं गवि न व्यपदिष्टमभविष्यत्। तस्माद् गोजातिव्यवच्छेदको यः समुदायनिष्ठो विशेषः, तदवच्छिन्ने गोव्यक्तिसमुदाये गोशब्दस्य सङ्केतग्रहणं बोध्यम्,

न तु गोव्यक्तौ। [२]समुदाये दृष्टाः शब्दा अवयवेऽपि वर्तन्ते इति परिभाषणाच्च तत्तद्व्यक्तावपि तत्तद्व्यक्त्यवयवेष्वपि च गोशब्दो व्यवहियते। अथ गोव्यक्तिव्यवच्छेदको यः सास्नादिसमुदायनिष्ठो विशेषः, तदवच्छिन्ने तत्र तत्र समुदाये ❀जगनी मोधलीत्यादयः शब्दाः सङ्केतिता भवन्ति, ते यथा समुदाये तथावयवेष्वपि नीयन्ते। खुरग्रहणे जगनीं गृह्णामि। लांगूलस्पर्शे जगनीं स्पृणोमीत्यादिव्यवहारात्। एवमेव सास्नादयोऽपि शब्दाः सास्नादीनामवयवेष्वपि द्रष्टव्याः। तदित्थं सास्ना-जगनी-गो-पशुशब्दाः पूर्वपूर्वसमुदायगर्भितोत्तरोत्तरसमुदाये बुद्ध्यवच्छिन्ने कृतसङ्केताः समुदाये वर्तन्ते अवयवेषु चेति सिद्धम्।

यत्तु ब्रूयात्-अतीतानां प्रत्युत्पन्नानामनागतानां च गोव्यक्तीनां समुदाये गोशब्दशक्तिग्रहो न सम्भवति, तत्समुदायविशेषणानामवयवभूतानां व्यक्तीनां सांकल्येन युगपदेकबुद्ध्या ग्रहीतुमयोग्यतया तत्समुदायस्य सुतरामग्रहणात्। 'नागृहीतविशेषणा बुद्धिर्विशेष्यमवगाहते' इति न्यायादिति, तत्र ब्रूमः—

यद्येवं तर्हि कुत्रापि भवतां शब्दशक्तिग्रहो न स्यात् सर्वत्रैव हि समुदायविशेषे एव शब्दप्रयोगदर्शनात्, तत्तत्समुदायावयवानां च साकल्येन ग्रहीतुमशक्यत्वात्। न हि यत्रापि सास्ना-लाङ्गूल-ककुद्-खुर-विषाणाद्यर्थपिण्डे येषां गोपदशक्तिग्र-

❀--कल्पितानि गोविशेषनामानि।

हस्तेपामपि तत्पिण्डान्तःप्रविष्टानामस्थिस्नायुमज्जाद्यर्थजातानां साकल्येन विज्ञानं पश्यामः ।

अतिरिक्तावयविवादनिराकरणम्

ननु च भोः-अत एव तु तत्र तत्तदवयवेषु समवायेनावयवी कश्चिदुत्पद्यते गौर्नामेत्यभ्युपगच्छामः, तथा चावयवानामग्रहणेऽवयवी तत्र गृह्यते, न त्वेवं तत्तद्गोव्यक्तिषु समवायेनान्यः कश्चिदुत्पद्यमानोऽवयवी दृश्यते—यत्राय गोशब्दस्य शक्तिं गृह्णीमहि—इति चेत्, भ्रान्तोऽसि, यथा हि खलु बह्वीषु गोव्यक्तिषु नान्योऽवयवी कश्चिदुत्पद्यते, निर्विशेषमत्रापि सास्नाद्यर्थेषु न त्वेवान्योऽवयवी कल्पयितव्यः, पदार्थकल्पनानौचित्त्यात् ।

ननु तत्तर्हि विषयालाभात् किमयमवयवी शब्द एव वापलप्यते ? उच्यते—

नावयविनः शब्दस्य तद्विषयस्य वापलापः क्रियते, विलक्षणावयविसमुत्पत्त्यभ्युपगमस्तु प्रतिषिद्ध्यते । न हि मृत्सु कपालेषु वा घटो नामातिरिक्तः कश्चन पदार्थ उत्पद्यते इति ब्रूमः, मृदतिरेकेणानुपलम्भात् । त्रिपुणं पश्यतोऽप्येकमात्रार्थोपलम्भेऽन्या मृत्तिका दृश्यते घटोऽन्यो दृश्यते [illegible] व्यभेदकल्पनानौचित्याच्च । कालदिग्भेदकोपाधिभेदादेव हि [illegible] प्रतिपद्यते सर्वत्र, न चात्र भेद [illegible] । घटोपलब्धिकालस्य तदुपादानमृदुपलब्धिकालत्वात्,

मृदनुपलम्भकाले घटानुपलम्भात् । एवं घटावच्छेदकदिग्विशेषोऽपि मृदवच्छेदकदिग्विशेषान्नातिरिच्यते, परस्परस्य परस्परदिग्विशेषाप्रतियोगित्वात् । इत्थमेव हि घटोपलब्धिदेशोऽपि मृदुपलब्धिदेशान्न भिद्यते । यदि नामायं घटो मृदन्योऽस्ति स तर्हि मृद्भिन्नदेशोऽपि उपलभ्येत, यदि नोपलभ्यते, ततो नान्यः, यदि नान्यः तत्तर्हि नोत्पद्यते, मृदः प्रागभावाभावात । उत्पद्यते च अन्यश्च उपादानकारणसमवेतत्वादन्यत्र नोपलभ्यते चेत्येतत्सर्वमपि वाग्विजृम्भणपटोरपदार्थकल्पनामात्रम्, सतो दृष्टान्तालाभात् । स्वकल्पिततादृशनियमानुरोधवागुराबद्धस्य तु भवतोऽगत्यातिरिक्तापदार्थकल्पनायै प्रवर्तितव्यं भवतीति कुत एवोपादानकारणनियमव्यवस्थाकल्पनैव न परिहीयते । पश्यन्ति हि तत्त्वदर्शिनो निर्वाचकाः 'नासतो विद्यते भावो नाभावो विद्यते सतः' इति । स यदि घटस्य प्रागभावः, तत्तर्हि परःसहस्रैरपि लोकोत्तरशिल्पचातुरीचणानां नोत्पादयितुं युज्यते ।

अथ कस्तर्हि 'घटो भवति' 'घटो जायते' 'घट उत्पद्यते' इत्यादिव्यपदेशानामर्थः ?

यमेवार्थमुद्दिश्य ते प्रयुज्यन्ते, स एवार्थः । कथमिति चेदित्थम्-अस्ति हि अतीतप्रत्युत्पन्नानागतानां कम्बुग्रीवाद्यवयवतीनां समुदाये घटशब्दः । यथै हि [illegible] मृत्कपालिकाकपालश्यामिकाद्याकारकारिते नूतनपुराणादिपुरुषव्यवहारयोग्यादिवि-

कल्पयति च घटद्रव्यक्तिविशेषे ठप्पणशब्दः । तत्र यथा ठप्पणावयवभूतेष्वर्थेषु यत्किञ्चिन्मृत्तानूपरोदनेन रन्ध्रमुत्पाद्यते, कुत्रचिच्च स्थानविशेषेऽतिरिक्ता मृत्कणाः संक्षेप्यन्ते, श्यामिकापनोदनेन च लालिमा जन्यते, अथापि ठप्पणशब्दो न विहन्यते, समुदायस्य विषयस्योपलम्भात्, प्रवृत्तिनिमित्तानुच्छेदाच्च । यदि नाम सर्वेऽवयवा उच्छिद्येरन् अवश्यं ठप्पणशब्दोऽप्युच्छिद्येत, विषयानुपलम्भात् । तत्र रन्ध्रस्थानीयमृत्तिका श्यामिका च ठप्पणात्मनश्ठप्पणशब्दाच्च प्रच्यवेते, अथ संक्षिप्ता मृत् रन्ध्राकाशं लालिमा च ठप्पणात्मन्यन्तर्भूय ठप्पणशब्दं गृह्णाति । एवमिहापि कम्बुग्रीवादिमद्द्रव्यक्तिसमुदायात्मके घटेऽवयवभूतानां तत्तद्घटद्रव्यक्तीनामुच्छेदेऽपि न घटशब्दो विहन्यते, समुदायस्य विषयस्योपलम्भात्, प्रवृत्तिनिमित्तानुच्छेदाच्च । यदि नाम सर्वा एव व्यक्तय एकान्तेन उच्छिद्येरन्, अवश्यं घटशब्दोऽप्युच्छिद्येत, विषयानुपलम्भात् । तत्र चित्रघटमृत्तिकापिण्डं घटात्मनो घटशब्दाच्च प्रच्यवेते, अथान्यन्मृत्पिण्डं घटात्मन्यन्तर्भूय घटशब्दं गृह्णाति तत्र यदेतदस्य मृत्पिण्डस्य घटात्मन्यन्तर्भावं घटशब्दग्रहणं च लोके पश्यामः, सर्वे तु भवति, जायते, उत्पद्यते इत्यादिनाम्नातशब्दानाकलयामः ।

अथ कोऽयमात्मा नाम यः सर्वत्र प्रतिपदमनुवर्तते घटात्मकं वस्तु पटात्मकं वस्तु मृदात्मको घटः मृदात्मकः पटः

❀—घटविशेषस्य कल्पितं नाम ।

पशोरात्मा मनुष्यस्यात्मेत्यादि उच्यते— स गुणो येन सत्तेतरभेदबुद्धिसमानाधिकरणास्तिबुद्धिरुत्पद्यते स आत्मा । तथा चेतरभेदबुद्धिसमानाधिकरणास्तिबुद्धिप्रयोजकत्वमात्मत्वम । तथा च घट इतरभेदबुद्धिसमानाधिकरणास्तिबुद्धिप्रयोजको यस्य तदिदं घटात्मकमित्यस्यार्थः ।

कः पुनरत्र घटः ? उच्यते— कश्चिदवयविसमवेतो विशेषगुणः । कोऽयमवयविशब्दस्य विषयः । विशेषवान् गुणसमुदायः । अथ कोऽयं विशेषः— इतरभेदबुद्धिप्रयोजको गुण एव । येन सता स इतरेभ्यो भिद्यते समुदायः । सर्व एव तु गुणाः स्वस्वघटितसमुदायस्य स्वस्वाघटितसमुदायप्रतियोगिकभेदबुद्धिप्रयोजका भवन्तीति सर्वे विशेषशब्दव्यपदेशभाजो भवन्ति, किन्तु यत्र समुदाये यस्य गुणस्य भेदप्रयोजकत्वं विवक्षितं स तत्र विशेषव्यपदेशायाभिधेयते । यथा कचटतपः इत्येकसमुदायः, कचटतमः इति द्वितीयः । कचटसपः इति तृतीयः । कचतसपः इति चतुर्थः । किचटतप इति पञ्चमः । गिचटतप इति षष्ठः । सरटतप इति सप्तमः । इत्येवमादयः सहस्रशः समुदाया भवन्ति । तेषां किं-किन्निबन्धनो भेद इति वक्तव्यम्, द्वितीयापेक्षया प्रथमे विशेषः मकारामावश्च, इतरे सामान्याः । प्रथमापेक्षया तु सो द्वितीये विशेषः पकारामावश्च इतरे सामान्याः । पञ्चमापेक्षया तु ककारे अकारः प्रथमे विशेषो न ककारोऽपि । यदि विवक्ष्यते ककाराकारसमुदायोऽपि विशेषः प्रतिपद्यते । प्रथमापेक्षया तु ककारे

इकारः पञ्चमे विशेषो न ककारोऽपि। यदि विवक्ष्यते ककारेकारसमुदायोऽपि विशेषः प्रतिपद्यते। पञ्चमापेक्षया तु प्रथमे ककारश्चकारश्च विशेषः सकारेकाराभावश्च। षष्ठे तु प्रथमापेक्षया सकारेकारौ विशेषः ककाराकाराभावश्च। एवमन्यत्रापि सर्वत्र नेयम्।

यत्र यो विशेषस्तदितरस्तत्र गुणः सामान्यशब्देन व्यवह्रियते। आपेक्षिकस्तु सामान्यविशेषव्यपदेशः। यस्य यत्समुदायापेक्षया विशेषत्वं तस्यैव तदितरसमुदायापेक्षया सामान्यत्वम्। यथा प्रथमस्य पकारभावस्य सकाराभावस्य च द्वितीयापेक्षया विशेषत्वं पञ्चमषष्ठसप्तमापेक्षया तु सामान्यत्वम्। तत्र तादृशेऽपि निबन्धने यत्र समुदायस्तत्समुदायाङ्गेन प्रतिपद्यते इति स विशेषगणः एव तस्यात्मा। अथ भिद्यमानोऽवयवेन हि तदवयवी समुदायोऽपि भिद्यते। स यथाऽवयवी भिद्यते इति तत्समुदायस्य विशेष इत्युच्यते। एवमयमवयवी समुदायोऽपि भिद्यते एवेति सोऽपि स्वस्य विशेष इत्युच्यते। एवमयमस्मिन् समुदाये द्वेधा व्यवहारो विवक्षाधीनः विशेष्यत्वेन विशेषत्वेन च। तथा चैक एव समुदायो भेदेन व्यवहारयोग्यो भवति विशेष्यत्वविशेषत्वाभ्यां विशेषगुणाभ्यामपेक्षिताभ्यां भेदसंसाधनात्। तथा च तस्य समुदायस्य द्वावात्मानौ संभवतः विशेषात्मकः स्वयं च स्वगतविशेषश्च। एतदुक्तं भवति द्वेधा व्यवहारोऽपि-घट आत्मना इति, घटस्यात्मा तस्मिन् घटात्मनि इति, अयमात्मा मनुष्यः अयमात्मा मनुष्यस्येति, ब्रह्मात्मकमेकमद्वितीय तत्त्वमित्यादि। यत्तु शब्दज्ञानानुपाती वस्तुशून्यो विकल्प इति पतञ्जलिस्मरणात् ब्रह्म आत्मा यस्येति विकल्पवृत्या समर्थयन्ति तन्न वयं प्रत्याचक्ष्महे। अनेनैव तु प्रकारेणैकस्य समुदायस्य भेदसिद्ध्या भेदेन शब्दप्रवृत्तिर्भवतीति विकल्पवृत्तिस्थलमुपपादयामः। न हि निर्विषये शब्दः प्रवर्तते अवश्यं हि शब्देन कश्चिदर्थो विषयीक्रियते। न चान्येन शब्देन विषयीकृतमर्थमन्यः शब्दस्तद्वाक्यस्थो विषयीकुर्वन् कुत्राप्यनुभूयते। तस्मादस्ति भेदोऽर्थस्य। स कीदृशो भेद इत्युच्यते--

ब्रह्मेति विशेषात्मकः समुदायो गृह्यते आत्मेति तस्य विशेषत्वमुच्यते विशेष्यात्मकस्तु समुदायो यत्पदार्थः। ब्रह्म आत्मा यस्येति। यत्तु सजातीयविजातीयस्वगतभेदशून्यं तावदखण्डं ब्रह्मेति नावकल्पते तत्रेतरभेदप्रयोजकत्वनिबन्धनो विशेषशब्दः नापि वा तस्य समुदायात्मकत्वं संभवति निर्गुणत्वादित्याहुस्तन्न ऐतदात्म्यमिदं सर्वं, ब्रह्मैवेदं सर्वं, सर्वं खल्विदं ब्रह्मेत्यादयुपनिषत्प्रामाण्यानुसारिणा सर्वधर्मोपपत्तेश्चेत्याचक्षाणेन भगवता बादरायणेन घटपटादियावद्धर्मधर्मितया तदात्म्यानुभवघटपटादिभेदप्रतिपन्नविधेयबुद्ध्यनुसारेण घटपटादियावद्धर्मसमुदायतयैव ब्रह्मपदार्थस्योन्नेतव्यत्वात्। यदि नाम तत्र धर्मधर्मिभावो व्युच्छिद्येत अवश्यं तत्तर्हि ब्रह्मादिशब्दप्रयोगोऽपि तत्रोच्छिद्येत। यावता स ब्रह्मशब्देन सर्वादिशब्दैर्वाभिनीयते तावदयं

समुदायात्मनैव प्रत्याय्यते इति निगूढं प्रत्येतव्यम् । यद्यपि वा एकः परमाणुरितरेभ्यो विशिष्यते तत्रापि विभिन्नदेशगतत्वप्रतीतौ विपर्यीभवतीति स विभिन्नो देशः प्रत्येकपरमाणुविशेषो बोद्धव्यः । विभिन्नस्थानावस्थानविशिष्टपरमाणुरेव वा तदुपचितपरमाणोस्तस्य विशेष इति तत्रापि द्वावात्मानौ संभवतः । एवमितरत्रापि सर्वत्र सर्वं एव विवक्षानुरोधेन गुणो वा गुणसमुदायो वा आत्मा भवतीति विवक्षैव शरणम् विभिन्नशब्दप्रयोगेषु यथा स आत्मनैवात्मानं हन्तीत्यत्र समुदायो नासात्मा देवदत्तादिशब्दाभिनीतः कर्तृत्वेन विवक्षितः । अथान्तरात्मा करणत्वेन शरीरात्मा च कर्मत्वेनेत्येवं योग्यतानुसारेण सर्वत्र द्रष्टव्यम । तदित्थं निरुक्तः स्वल्पयमात्मपदार्थः ।

अस्त्येव स एकः मृत्पिण्डाख्यः समुदायः तत्र कतिपये गुणा अवयवा भवन्ति । अस्मिन्नेव घटशब्दोपनीतो महाघटावयवभूतोऽपरः समुदायः तत्रापि कतिपये गुणा अवयवा भवन्ति । तत्र मृत्पिण्डगताः कतिपये गुणास्तत्र घटेऽप्यनुवर्तन्ते ते सामान्याः, ये पुनर्मृत्पिण्डे न भवन्ति घटे तु भवन्ति ते घटस्य वैशेषिका गुणाः । अथ ये घटे न भवन्ति मृत्पिण्डे तु भवन्ति ते मृत्पिण्डस्य वैशेषिकाः ये चात्र वैशेषिकास्ते तस्यात्मनोऽवयवाऽवयवा उच्यन्ते, तत्संबन्धेन तद्व्यपदेशः । अतः सामान्यगुणसमुदायाच्च वैशेषिको गुणो बलवान् । घटवैशेषिकस्तु तथान्तर्भाव्यते । ततश्च तत्समुदायो मृत्पिण्डबुद्धिर्निवर्तते घटबुद्धिश्चोत्पद्यते । अतश्चेदं

शक्यं वक्तुं । मृत्पिण्डगताः सामान्यगुणाः घटवैशेषिकगुणव्यवाये मृत्पिण्डात्मानं बिभ्राणा आसन् । अथेदानीं मृत्पिण्डवैशेषिकगुणव्यवायेन घटवैशेषिकगुणसमवाये सति घटात्मानं बिभर्तीति ।

तत्र यदिदमात्मभरणं स भूधात्वर्थः । यथा च ते सामान्यगुणा घटविशेषगुणरूपमात्मानं बिभ्रति तथैवायं समुदायोऽपि तं विशेषगुणरूपमात्मानं बिभर्तीति घटो भवतीति व्यपदिश्यते । तत्र घटशब्दप्रवृत्तिनिमित्तं स घटस्यात्मैव । यावता सोऽनुवर्तते तावता तदितरगुणानामुपचयापजनयोरपि नास्य शब्दस्य निवृत्तिः तदुपचये तु सर्वेषामितरेषां गुणानां सत्त्वेऽपि स शब्दो निवर्तते । यच्च शब्दस्य प्रवृत्तिनिमित्तं तत्संज्ञाकरणार्थं त्वताशब्दौ प्रत्ययौ भवतः । भवति घटत्वं नाम समुदायगतः स गुणः येन सता स समुदायो घटशब्दभागस्ति यदभावे च घटशब्दो निवर्तेत । स च गुणोऽवयवसन्निवेशात्मकाकारादिरेव स्यादन्यो वा तादृशः सङ्केतग्रहकाले विशेषतया प्रतिपन्नः न त्वयमखण्डोपाधिः कश्चिदपूर्वो धर्मविशेषः कल्पयितव्यः तत्कल्पनाया निर्मूलत्वात् । नन्वेवं कणादगौतमाभिज्ञानविरोधः प्राप्नोति ताभ्यां हि जात्याकृतिव्यक्तयः पदार्थः " व्यक्त्याकृतिजातयस्तु पदार्थ" इति शिष्यते । भवतां च विशेष एव जातिर्विशेष एवाकृतिर्विशेष एव व्यक्तिरित्याशयमासादयामः । यदि नाम जात्याकृतिव्यक्तीनामेकार्थ्यमभ्युपेतं स्यादन्यतमोक्त्या कृतं स्यात्

पुनस्तश्चितयव्यासव्यवृत्तिरेका पदशक्तिरित्युच्यते । अत्रोच्यते विषमस्तावदयमुपन्यासः । न वयं ब्रूमः विशेष एव जातिविशेष एवाकृतिर्विशेष एव व्यक्तिरिति किन्तर्हि जातिरेव विशेषः, आकृतिरेव विशेषः, व्यक्तिरेव विशेषः इति—नैतावतां जात्याकृतिव्यक्तीनामैकार्थ्यमभ्युपेतं भवति किन्तर्हि सर्वेषां तत्रतत्र प्रवृत्तिनिमित्तत्वम् जातिर्वा घटत्वमाकृतिर्वा घटत्वं व्यक्तिर्वा घटत्वमिति प्रतिजानीमः । का तर्हि जातिः, का चाकृतिः, का वा व्यक्तिः । सा जातिर्यया ऽसौ समुदायोऽन्यः सन्नन्यो जायते मृत्पिण्डसमुदायो यद्गुणसम्बन्धेन घटाख्यसमुदायो जायते स गुणो जातिः । एतदेवैतस्या जातेर्जातित्वं यदस्यां सत्यामन्यथागृहीते समुदाये ऽन्यथाबुद्धिर्जायते इति । स च नावयवसंनिवेशात्मकाकारे एव सर्वत्र । आकारभेदे ऽपि तत्त्वदर्शनात् ।

यथा हि शुको नाम पक्षिविशेषः शुक्लो रक्तो हरितश्चित्रो बृहत्कायो मध्यमकायो लघुकायश्चानेकधाकारो भिद्यते, किन्तु शुक एव तूच्यते, ततो विज्ञायते न त्वेव तत्राकारः शुकशब्दप्रवृत्तिनिमित्तं किन्तु ततो विलक्षण एव सामान्येनानुगतो वागादिधर्म्मः, सा तत्र जातिः ॥१॥

एवं क्वचिदाकारभेदेनैव शब्दो निवर्तते । यथा पिण्डघटिकाकुण्डिकासु यथा वा पिण्डरुचकफटकस्वस्तिकेषु एक एव मृत्समुदायः कयाचिदाकृत्या योजे पिण्ड इति तदितराकृत्या

घटिका इति तदितराकृत्या च कुण्डिकेति व्यपदिश्यते । एवं सुवर्णखण्डोऽप्याकृतिभेदेन पिण्डो वा रुचको वा स्वस्तिको वेत्यनेकधा व्यपदिश्यते । तत्रैतेषामाकृतिरेव प्रवृत्तिनिमित्तं विज्ञायते । आकृतिर्हि नाम स गुणो भवति यस्मिन् सति बहवोऽप्यर्था गुणात्मका एकत्वबुद्धिविशेषिताः सन्त एकबुद्ध्यारूढमर्थान्तरं गृह्णन्ते । अन्तर्भावेन संनिधानं ह्यापदार्थः । 'अभ्रं भ्रां अभ्रः, आगच्छतीत्यादौ तथा दृष्टत्वात् । तथा च एतदेवाकारस्याकारत्वं यदेतेनान्येऽर्था बहवोऽप्याक्रियन्ते अन्तर्भाव्य संनिधाप्यन्ते, क ? एकस्यां बुद्धौ । स चायमाकारो गुणस्तावदेकात्मानुगतानामनेकेषामर्थानामात्यन्तिकसन्निकर्षक्रमानुबन्धेनावस्थानं नाम ॥१॥

अथ व्यक्तिभेदादपि शब्दो भिद्यते; नायं घटशब्दपूर्णो नाम कस्तर्हि वर्णक्रमो नामेत्युच्यते । व्यक्तिरेवात्र भेदकतयाऽभिप्रेयते । का च व्यक्तिपदार्थः ? अक्तेर्विरोधे व्यक्तिशब्दः, अक्तिरित्यञ्जनमाह । तच्च कस्मिंश्चित्स्वतन्त्रद्रव्ये कस्यचित्परतन्त्रद्रव्यस्यानुषङ्गः । तथा च प्रकृते कस्मिंश्चित्समुदायद्रव्ये कस्यचिदवयवद्रव्यस्यात्मभावः प्रतिपद्यते । तत्र समुदायात्मना गृहीतस्य तस्यावयवद्रव्यस्य पार्थक्येन यदग्रहणं तदेतस्य तत्राञ्जनं व्यक्तम् । तद्विशेषस्य तं समुदायात्मानमनपेक्ष्य पार्थक्यात्मना ग्रहणम् । ततश्च व्यक्तिविशेषो व्यक्तिः, विरुद्धा वा क्तिर्व्यक्तिः सेयं व्यक्तिः ।

अथवा व्यक्तिविशेषे व्याक्रियतुः प्रतिष्ठतिवत् । व्यञ्जनं व्यक्तिः व्यज्यते या योऽर्थः सा व्यक्तिः तथा च पृथगात्मता वा पृथगात्मकः समुदाय एव वा व्यक्तिपदार्थ इति सिद्धम् ।

यस्य समुदायस्य समुदायान्तरेण सर्वथा जात्याकृत्यादिगुणसाम्यं स्यात्, गृहीतस्थानमात्रं तु भिद्यते, तत्र तादृशविभिन्नस्थानमेव विशेष उच्यते-व्यक्तिरित्युच्यते-पृथगात्मत्वं नाम । तत्त्वं चात्मनः पृथक्त्वम्-विभिन्नदेशावस्थानमिति यावत् । तथा चावयवानां तत्तत्क्रिया रूपं, या देशलक्षणद्रव्यरूपो वा गुणः प्रकृतेः विशेषः स्यात्, सा व्यक्तिरिति सिद्धम् ।

अथवा विशेषगुणविशेषितः समुदायो व्यक्तिरिति वक्तव्यम्, यदा स एव विशेषतयाऽभिप्रेतः स्यात् । समुदायाभिप्रायेणैव तु व्यवहरन्ति-इयं व्यक्तिरित्थं भूते-इत्यादि ।

ननु यदि पृथगात्मत्वं विशेष इत्युच्यते, तदानीं जातिव्यक्त्योः को विशेषः ?

अयं विशेषः—प्रत्येकं समुदाये द्वौ शब्दौ प्रवर्तेते;—तत्समुदायसङ्केतितशब्दः, तत्समुदायगर्भितसमुदायसङ्केतितशब्दश्च । यथा कस्मिंश्चित्समुदाये ठप्पणशब्दश्च घटशब्दश्च । यत्किञ्चिन्मौसाहित्यविशिष्टे रासभशब्दश्च मनुष्यशब्दश्च । तत्र यथा ठप्पणशब्दस्तत्समुदाये निरूढः, तथा घटशब्दोऽपि तत्समुदायगर्भितसमुदायान्तरे निरूढः । समुदाये दृष्टाः शब्दा अवयवेऽपि वर्तन्ते-इति परिभाषणात्, तत्समुदायावयवे ठप्पणाख्यसमुदायेऽपि स शब्दोऽनुवर्तते । तत्र नैतस्य शक्तिभेदो द्रष्टव्यः । नावयवापर्य्याप्तस्य समुदायपर्य्याप्तिः संभवतीति परिभाषणात्समुदायशक्त्यैवावयवानामपि संभवति संग्रहे शक्त्यन्तरानुपयोगात् । यथा हि हस्ते गृहीते देवदत्तो गृहीत इति व्यपदिश्यते, पादे गृहीते कर्णेवा गृहीते देवदत्तो गृहीत इति व्यपदिश्यते । नचात्र कश्चिन्मनोधीः हस्ते पादे कर्णे वा समुदायशक्तिविलक्षणानेकशक्तिः प्रतिपद्यते, समुदायशक्त्यैव हि निराशङ्कं तत्र तत्रावयवेऽपि तं शब्दं पर्य्युपयुङ्क्ते । यथा वा धान्यराशौ धान्यशब्दो दृष्टः, स तद्भागप्रदेशभूतो प्रस्थधान्ये तदवयवे प्रत्येकं धान्ये च निरवरोधमनुवर्तते, एवमेवायं घटशब्दोऽपि कस्मिंश्चित्समुदाये निरूढस्तस्यैव शक्त्या तदवयवे ठप्पणावष्ठनादावपि निष्प्रतिपक्षमनुवर्तते । तत्रास्त्येव तत्तदवयवे स कश्चिद्विशेषो येनायमवयवस्तत्समुदायानुगतो भवति । यद्भावे च स तत्समुदायादपवर्तते । सोऽयमवयवगतोऽवयवत्वसापेक्षः समुदायपक्षपाती विशेषो जातिरित्युच्यते ।

वस्तु तद्गतयद्गतोऽवयवत्वनिरपेक्षः स्वावयवसमुदायत्वसापेक्षभावो विशेषः सा व्यक्तिरित्युच्यते । व्यक्तिमनुरुध्य ठप्पणाद्याः शब्दाः, जातिमनुरुध्य च घटादयः शब्दास्तत्रैकस्मिन्नेव समुदाये (समुदाये) प्रवर्तन्ते इति द्रष्टव्यम् । आकृतिश्च यत्र प्रवृत्तिनिमित्तं

भवति, तत्र जातिरित्युच्यते। यत्र तु न प्रवृत्तिनिमित्तम्, तत्र जातिभिद्यते-इत्याकृतिपदार्थे द्वेधा व्यवहारः।

अथवा जात्याकृतिव्यक्तिनामैकार्थ्यमस्त्वास्ताम्, विषयभेदास्तु भवति व्याप्तिसापेक्षम्। यथाहि-गजभद्रदङ्गलव्यपदेशेषु। तत्रास्त्येष कश्चिदवयविसमुदायो यत्र गजशब्दो निरूढः, तद्गतः स्वलु विशेषो जातिशब्देनाभिनेतव्यः। तयासौ समुदायो हयादिसमुदायेभ्यो भिद्यते। अथ यः कश्चिदवयवसमुदायो यत्रायं भद्रशब्दो निरूढः, तद्गतश्च स्वलु विशेषः आकृतिशब्देनाभिनेतव्यः। तयासौ समुदायो मन्द्रमृगादिसमुदायेभ्यो भिद्यते। अथापि यः पुनरेतदवयवसमुदायो यत्रायं दङ्गलशब्दो निरूढः तद्गतोऽप्यस्ति विशेषः, स व्यक्तिशब्देनाभिनेतव्यः तयासौ समुदायो विद्वलसौदल्लादिसमुदायेभ्यो भिद्यते। तदित्थं योऽयं दङ्गलो नाम कश्चिद्भद्रजातीयो गजः, तत्र त्रयो विशेषा उपलभ्यन्ते। एको दङ्गलाख्यसमुदायमात्रपर्याप्तेदवयवकरचरणमुखपुच्छाद्यनेकार्थसामान्योऽपि विद्वलसौदल्लादिनामकभद्रजातीयगजान्तरेषु न पर्य्याप्नोति, स करचरणाद्यवयवान समुदायानपेक्ष्य जातिशब्दं गृह्णाति, करचरणाद्यवयवसमुदायमपेक्ष्य पुनराकृतिशब्दं गृह्णाति, भद्रगजसत्समवयविसमुदायमपेक्ष्य तु व्यक्तिशब्दम्। एवमन्यस्तत्र विशेषो दङ्गलाख्यसमुदायपर्य्याप्तः सन् विद्वलसौदल्लादिनामकभद्रजातीयगजान्तरेष्वपि पर्य्याप्नोति, स मन्द्रादिजातीयेषु तु गजेषु न पर्य्याप्नोति, सोऽयं सौदल्लविद्वलदङ्गलादीनवयवान् समुदायान्

मम नाम प्रथमं जानलेदो मात्र पिता च दथतुश्चत्वारि। तत्तो गोधायो पुनर्दत्ते वयं त्रिभ्रात्रे तवनाम। कैका काश्च ७।३।१८ मम च नाम तव जानलेदो. वासस्री इक. द्विवसानौ चराकः। ते त्रिभ्रतो दशसे जीवसे च अथाश्वयं नौ तन्वो जानलेदः। २५।

अपेक्ष्य जातिरित्युच्यते। सौदल्लविद्वलदङ्गलाद्यवयवसमुदायं भद्राख्यमपेक्ष्य पुनराकृतिरित्युच्यते। गजाख्यमवयविसमुदायमपेक्ष्य तु व्यक्तिरिति।

अथैवमन्यस्तर्ति यो विशेषः स हि दङ्गलाख्यसमुदायपर्य्याप्तः सन् मृगेमन्द्रादिजातीयेष्वपि गजेषु पर्य्याप्नोति, सोऽयं भद्रमन्द्रमृगादीनवयवान् समुदायानपेक्ष्य जातिर्भवति। भद्रमन्द्रमृगाद्यवयवसमुदायमपेक्ष्य पुनराकृतिः। अथ प्राणिसङ्गकमपरमवयविनं समुदायमपेक्ष्य तु व्यक्तिर्भवतीति। तदित्थं यथैक एक देवदत्तो नाम समुदायः कश्चिदपेक्ष्य पुत्र इति व्यपदिश्यते, अपरमपेक्ष्य पितेति, ततोऽप्यपरमपेक्ष्य भ्रातेति व्यपदिष्टो भवति तत एकार्थ्यम्। अथ यमपेक्ष्य पुत्रो भवति; न तमपेक्ष्यैव पितापि व्यपदिश्यते, अतोऽप्यान्तरता। एवमेवैतासां जात्याकृतिव्यक्तीनामनवस्थितपदार्थकानामेकार्थ्यं चानेकार्थ्यं च द्रष्टव्यम्। अन्विताभिधायित्वात्। स यदाऽनेकार्थ्यं प्रतिपद्यते, ततो जात्याकृतिव्यक्तयः पदार्थ इति पार्थक्येनोपन्यस्यति। अथ यदैकार्थ्यं प्रतिपद्यते, ततः सर्वेषामविशेषेण पदार्थत्वमाह। तेष्वेव हि विशेषशब्दः प्रवृत्तिनिमित्तशब्दः स्वात्मशब्दश्च यत्किञ्चिदर्थसापेक्षं भेदेन प्रवर्तन्ते इति सिद्धम्।

पूर्वपक्षसमाधानेन दृढीकरणम् ६

ननु कस्मिंश्चिन्मृत्पिण्डे कृष्णशब्दो घटशब्दश्च प्रयुज्यते, तत्र कथं पूर्वापरावस्थाविशेषाश्रय एकोऽर्थो रूढ इति प्रति-

पत्यसे तदेतन्नावकल्पते । तथा च सति यथा ठप्पणाघटयोः भूस्वरूपे ठप्पणाभ्यायमवयव इति प्रतिपद्यन्ते तथा ठप्पणोऽपि घटस्यावयवोऽयमिति प्रतिपद्येरन् । न तथा कस्यापि भेदेन प्रतिपत्तिः प्रतिपन्नामहे । तस्मान्न तादृशः करचरणपूर्वः समुदायो वक्तुं युज्यते यत्र घटशब्दो निरूढः, यस्य वा ठप्पणाद्ययोऽवयवाः सिद्धेयुरिति चेत्तत्राच्यते--

अवश्यं चैतदेवं विज्ञेयम् । अन्यथा ठप्पणाघटशब्दयोरुभयोरपि समानविषयत्वेऽभ्युपगम्यमाने ठप्पणनाशे यथा ठप्पणशब्दो निवर्तते, मृत्पिण्डान्तरे च पुनः समयग्रहणमपेक्षते स्वविषयीकरणाय, तथा घटशब्दोऽपि निवर्तेत, मृत्पिण्डान्तरे च पुनः समयग्रहणमपेक्षेत स्वविषयीकरणाय । न च तथा पश्यामः । स यथा कुड्यव्यवहितशरीरस्य रन्ध्रगृहीतयत्किञ्चित्प्रान्तावयवस्य तादृशदृश्यमानयत्किञ्चिदवयवावच्छेदेनैव अयं कौण्डिन्यः इति सङ्केतं ग्राहितः पुरुषः शनैः सञ्चरति तस्मिन् कौण्डिन्ये गृहीतसङ्केतकावयवावच्छेदेन कुड्यप्रदेशव्यवहिते सत्यपि, तदितरावयवेऽप्यगृहीतपूर्वे सम्प्रति रन्ध्रदृष्टे 'अयं कौण्डिन्यः' इति निश्चयात्मिकां बुद्धिं कुरुते, न च पुनस्तत्रापि सङ्केतग्रहणमपेक्षते ।

एवमिहापि कालव्यवहितशरीरस्य स्वरूपकालगृहीतयत्किञ्चिदवयवस्य तादृशदृश्यमानयत्किञ्चिदवयवावच्छेदेनैव 'अयं घटः' इति सङ्केतं ग्राहितः पुरुषः कालचक्रानुरोधेन शनैः सञ्चरति

तस्मिन् समुदाये गृहीतसङ्केतकावयवावच्छेदेन कालप्रदेशव्यवहितेऽपि तदितेतरावयवेऽप्यगृहीतपूर्वे सम्प्रति खण्डकालदृष्टे 'अयं घटः' इति निश्चयात्मिकां बुद्धिं करोतीति साम्येन प्रतीयते ।

ननु च भोः युगपदुपलब्धयावदवयवे देवदत्तशरीरे करचरणोरःकण्ठशिरःप्रभृतिप्रदेशानामेकत्र संहत्य गृहीतानां समुदाये देवदत्तशब्दोऽन्यत्र गृहीतः, न गृहीतं चैतेषां करचरणादीनां पार्थक्येन कुत्राप्यवस्थानं देवदत्तादिशब्दप्रतिपाद्यत्वं चेति कृत्वा प्रकृतेऽपि तस्मै विधेयाय करचरणादियत्किञ्चिदवयवावच्छेदेन कौण्डिन्यत्वे ग्राहिते युक्तं तदुपलब्धं यत्किञ्चिदवयवानुलक्षितावयवसमुदाये कौण्डिन्यशब्दसंकेतग्रहणम् । न त्वेवमिहापि तत्सम्भवति । कुड्यप्रदेशान्तर्हितं कौण्डिन्यसमधर्मणां देवदत्तादीनामन्यत्र यावदवयवावच्छेदेन युगपदुपलम्भवत् कालप्रदेशान्तर्हितघटसमधर्मणां केषाञ्चिदप्यन्येषामन्यत्र यावदवयवावच्छेदेन युगपदनुपलम्भात् तद्दृष्टान्तालाभात् । इति चेन्मास्तु कालान्तर्हितदृष्टान्तलाभः । एतेषां तु कालान्तर्हितशरीराणां सर्वेषामेव दार्ष्टान्तिकत्वेनोपनेयत्वादिहापि स वै दृष्टान्तो भविष्यति यः खलु कुड्यान्तर्हितशरीराणामुच्यते । यस्यापि सरन्ध्रकुड्यान्तर्हितशरीरः कौण्डिन्यो न कुत्रापि युगपद्यावदवयवोपलब्ध्या गृहीतः, तस्याप्येकस्मिन्नवयवे सङ्केतग्रहणे तदितरेष्वप्यवयवेषु स सङ्केतो गृहीतो भवति, एवमिहापि महाकालान्तर्हितशरीरो घटो न कुत्रापि युगपद्यावदवयवोपलब्ध्या गृहीतः, अथाप्येकस्मिन्नवयवे सङ्केतग्रहणे

द्भावयवत्वे प्रदेशाद्यभिधानाः, तिरोहितावयवत्वे च देशाद्यभिधानाः ।

६. विप्रकृष्टावयवास्तत्तद्गुणक्रियादिकृत्वानुगम्भितप्रदेशा रक्तमधुरोष्णादयो मैत्रिजाध्यापकप्राड्विवाकादयश्च उद्बुद्धावयवत्वे धर्मिशब्दाः, तिरोहितावयवत्वे तु जातिशब्दाः ।

७. विप्रकृष्टसमावयवाः विप्रकीर्णप्रयोजनानुबद्धा गृहवनजलाशयाः पितृपुत्रकलत्राणीत्यादयः उद्बुद्धावयवत्वे इतरेतरयोगलक्ष्याः, तिरोहितावयवत्वे तु समाहारपदप्रतिपाद्याः ।

तदित्थंभूतैः सप्तविधैरेव समुदायैः सर्वमिदं जगत सुपर्याप्तं कृतावयवं च । तेषु पुनः सर्वेष्वेव समुदायेषु सर्वे गुणास्त्रेधा विभक्ता दृश्यन्ते- स्थायिभावो विभावोऽनुभावश्चेति ।

यत्र समुदाये यावान् गुणः परिवृत्त्यसहस्तावान् स्थायिभावः ।

यावांस्तु सहते परिवृत्तिम् यत्परिवृत्त्यैव चायं समुदायोऽनेकधात्वं गृह्णाति स सर्वोऽपि विभावः ।

अथ बाह्यतत्समुदायानन्तर्भूतोऽपि तत्सम्बन्धोपकल्पितबौद्धतत्समुदायान्तर्भावितो बुद्ध्युपनीतो गुणकलापोऽनुभावः ।

पुनः प्रत्येकमेषां द्वैविध्यम् तथा च स्थायिभावो द्वेधा— तद्भावोऽतद्भावश्च । स तद्भावो येन विना तत्त्वं विहन्यते यथा

घटे आकृतिविशेषः । यदि नाम साकृतिर्न स्यात्, घटस्य घटत्वं विहन्येत, अयं घट इति व्यवहारश्च तत्र न स्यात् । तस्मात्तत्रेयमाकृतिर्घटभावः । अथ सोऽयमतद्भावो येन खलु नाप्राप्तः सहभावस्तत्त्वस्य । यथा घटे रूपसामान्यम् । अवश्यं येन केनापि रूपेण तत्र भाव्यम् । स कदाचिद् रक्तो भवति, कदाचिन्नीलः, रूपविशेषाः परिवर्तन्ते रूपसामान्यन्तु नाप्राप्तम् । तस्मात्तद् रूपसामान्यमतद्भावः स्थायिभावः । एवं विभावो द्वेधा-आलम्बनविभावः, उद्दीपनविभावश्च ।

यदि नाम द्रव्यशब्दप्रतीतो गुणसमुदायः परिवृत्तिसहो भवति, तदा स आलम्बनविभावः । यथा घटे मृत्तिका । यदि वा मृद्घटः स्यात्, ताम्रघटः सुवर्णघटो वा, सर्वथापि तु घटशब्दो न विहन्यते । मृत्ताम्रसुवर्णैर्विभवति च, तस्मान्मृदादीनि द्रव्याणि तत्र विभावा इष्यन्ते ।

अथ सोऽयमुद्दीपनविभावो यदि गुणविशेषः परिवर्त्तेत, यथा घटे नीलगुणः । नीलघटो वा स्याद्, रक्तघटो वा, पीतघटो वा, सर्वथापि तु घटशब्दो न विहन्यते, नीलरक्तपीतैस्तु गुणैर्विभवति सः । तस्मान्नीलादयो गुणास्तत्र विभावा इष्यन्ते ।

एवमयमनुभावोऽपि द्वेधा-बाह्यश्चाभ्यन्तरश्च । यदि नाम बाह्ये घटाख्ये समुदाये किञ्चिदर्थान्तरमुपनीयेत, यच्च घटेन तत्र नात्मसात्क्रियेत, अथापि घटशब्देन तद्विशिष्टग्रहणं कर्तुं

यदृच्छा शब्दतोऽर्थानां संकेतः स्वेच्छयाकृतः ।
किंचुकागमितोस्त्यत्र यूटोबच्चोऽस्ति नास्ति तत् ॥
निरूढलक्षणाभाग्भिन्नं तत् पुनः पङ्कुच्यते । धर्मसंग्रह १७/१६५-६६

शक्यम्, स बाह्योऽनुभावः यथा घटे वस्त्रावरणम् । स यदि घटो वस्त्रेणावृतः स्याद्, मृत्तिकया वानुलिप्तः स्याद्, नानारेखाभिरङ्कितो वा स्यात्, अथापि घटशब्देन तद्विशिष्टः शक्यो ग्रहीतुम् । न च पुनरेतद् वस्त्रादिकमपि घटशब्दसङ्केतितसमुदायकुक्षिस्थम्, अथापि तद्ग्रहणं भवति । ते इमे वस्त्रादयो बाह्यानुभावाः ।

अथेन्द्रियाणां बाह्यसमुदायेन सह संप्रयोगे तत्समुदायानुरूपोपलब्धिजन्मना बौद्धः स समुदायोऽनुभूयते । तत्र च बौद्धे समुदाये बाह्यसमुदायानन्तःप्रविष्टा अपि कतिपये गुणा बुद्ध्युपनीता अन्तर्भवन्ति, यथा घटानुभवे एकत्वादयः । नहि एकत्वं द्वित्वं पृथक्त्वं वा घटज्ञाने नियमेन प्रतीयमानमपि घटबाह्यसमुदाये किञ्चिद् भवति, ग्राहिकायास्तु महत्या बुद्धेः प्रत्यवयवास्तेऽनुकल्पन्ते । तस्मादाभ्यन्तराः खल्विमेऽनुभावाः ।

एते च समुदायस्वरूपाधायका गुणा अवयवाख्याः पुनर्द्वेधा-गुणशब्दो धर्मश्च, द्रव्यशब्दो धर्मी च । द्रव्यशब्दोऽपि धर्मशब्दो भवति, यदि तस्यापरसमुदायस्वरूपारम्भकत्वं विवक्ष्यते । यथा शुक्लो हस्तीत्यत्र शुक्लशब्दाभिनेयस्य समुदायस्य शौक्ल्यं गुण एव धर्मः । स न धर्मी न वा द्रव्यशब्दः । अथ पुनर्हस्तिशब्दाभिनेयस्य तस्यैव समुदायस्य हस्तो धर्मः, स हि स्वस्वरूपारम्भसापेक्षः धर्मी भवति, द्रव्यशब्दश्च । तस्य येऽपरे धर्मास्तेषु द्वेधा व्यवहारः, यदि विवक्ष्यते, ते अवयविसमुदाय-

धर्मा उच्यन्ते, अथ विवक्ष्यते, तर्हि ते अवयवात्मकसमुदायधर्मा उच्यन्ते । यथा अङ्गुलयो देवदत्तधर्माः सन्तो देवदत्तहस्तधर्मा आख्यायन्ते । तत्रैका व्युत्पत्तिः । यत एव हेतोरङ्गुलीनां हस्तावयवत्वम्, तत एव तु देवदत्तावयवत्वमपि । अस्ति ह्येतत्-सोऽप्यङ्गुलिघटितः समुदायो यत्र वक्षोग्रीवादयो नान्तर्भवन्ति, तत्रायं हस्तशब्दो निरूढः । अथ सोऽप्यङ्गुलिघटितः समुदायो यत्र वक्षोग्रीवादयोऽप्यन्तर्भवन्ति, तत्रायं देवदत्तशब्दो निरूढः । तेनैता अङ्गुलयो देवदत्तधर्मधर्माः सम्भवन्तो देवदत्तधर्मा अपि संभवन्ति । एवमन्यान्यप्येतानि ग्रीवादीन्यङ्गानि भवन्ति देवदत्तधर्मधर्माश्च देवदत्तधर्माश्च । तत्रावश्यमयं देवदत्तशब्दोऽपि तेषामवयवानां समुदाये निरूढस्तेष्ववयवेषु वर्तते इति वक्तव्यम् ।

यदृच्छाशब्दखण्डनोपसंहारः

देवदत्तशब्दश्च यदृच्छाशब्दः, यस्यापि देवा एनं देयासुरित्याशिषाभिसंबन्धो न विवक्ष्यते, तस्यापि देवदत्तशब्देन सङ्केतः क्रियमाणो दृश्यते । यश्च महामूर्खस्तत्रापि पण्डितराजशब्दः कृतसंकेतो भवति । योऽपि निर्द्धनो मनुष्यः सोऽपीष्यते लक्ष्मीनाथः । एवं दरिद्रः शूद्रो वृद्धोऽप्युच्यते युवराज इति । स ततो न जातिगुणक्रियाशब्दः । पारिशेष्यादवश्यमयमप्रादेशिको यदृच्छाशब्दो भवितुमर्हति । यथा सिङ्गुलः पिलातो गुम्बक इत्यादयः, खूसरठक्कनवेचनादयश्च । स सर्वोऽपि तत्तदवयवात्म-

कानेकव्यक्तिनिष्ठः इत्युपपादितम्। ततश्च यथा लस्यूजनि-पल्यूल-तिथि-सुमेकादयोऽनेकव्यक्तिनिष्ठत्वाज्जातिशब्दतया इष्यन्ते, निर्विशेषमयं यदृच्छाशब्दोऽपि तथैवानेकव्यक्तिनिष्ठ इति जातिशब्दो भवितुमर्हति। ततो नातिरिक्तो यदृच्छाशब्दः। ननु यद्येवं घटाः पटा इत्यादिवदेतेष्वपि बहुवचनं प्रसज्येत, यत्र हि पटुरहं देवदत्तो ब्रवीमीत्येवं प्रयुङ्क्ते, तत्र 'पटवो वयं देवदत्ता ब्रूमः' इत्येवं प्रयुज्यमानमपि साधीयः स्यात-इति चेन्नैष दोषः, इष्टत्वात्। अनर्थसन्देहोत्पादकत्वात्तु तादृशां प्रयोगाणामुपचारो न प्रसिद्धः। अप्रसिद्ध्या चाप्रयुक्तिः, अप्रयुक्त्या च नान्वाचक्षते शब्दकाराः, न पुनरर्थदोषान्नाचक्षते इति भ्रमितव्यम्। 'वयं ब्रूमः' 'गुरुपादाः समागताः' 'इमे ब्राह्मणाः' इत्येकस्यामेव व्यक्तौ बहुवचनोपचारात्। तस्मादवश्यमेकव्यक्तिनिष्ठा अपि शब्दा अनेकव्यक्तिनिष्ठा इष्यन्ते—इति नास्ति वैजात्यमेतेषां जातिशब्देभ्य इति सिद्धम्। ततो यदृच्छाशब्दस्य जातिशब्देभ्यो नातिरेको गाढं प्रत्याख्यात इति वेदितव्यम्।

अथेदमप्यत्रानुसन्धेयम्—अस्ति खलु अतीतानागतप्रत्युत्पन्नैः सर्वैरपि घटजातीयैः परस्परविलक्षणदेशकालावच्छिन्नैः कृतावयवे विलक्षणे समुदाये घटशब्दो निरूढः। स तयैव रूढ्या तदवयवेष्वपि तत्तद्घटजातीयव्यक्तिजातेषु प्रवर्तते। अस्ति खलु अतीतानागतप्रत्युत्पन्नैः सर्वैरपि पशुजातीयैर्गृहजातीयैः क्षेत्रजातीयैश्च परस्परविलक्षणदेशकालावच्छिन्नैः कृतावयवे विलक्षणे समुदाये

ग्रामशब्दो निरूढः, सम्भलशब्दश्च। स तयैव रूढ्या तदवयवेष्वपि तत्तदेकैकजातीयार्थजातेषु प्रवर्तते, सम्भलो नाम ग्राम आगत इति ग्रामो दग्ध इति, ग्रामः प्रभूतसस्य इति च। एवमेवास्ति खलु अतीतानागतप्रत्युत्पन्नविभिन्नावस्थैः सर्वैरपि शरीरप्रतीकजातीयैः परस्परविलक्षणदेशकालावच्छिन्नैः कृतावयवे विलक्षणे समुदाये देवदत्तशब्दो निरूढः। स तयैव रूढ्या तदवयवेष्वपि तत्तत्करचरणाद्यर्थजातेषु प्रवर्तते 'देवदत्तः काणो बाधिर्ययुक्तश्चेति'। तदित्थं सति यथा घटशब्दो ग्रामशब्दश्च जातिवचनः स्यात् तथा सम्भलशब्दो देवदत्तशब्दश्च जातिवचनः स्यात्। ततो नातिरिच्यते यदृच्छाशब्दो जातिशब्दादित्युक्तमेतावता महता प्रबन्धेन।

अथ सर्वोऽपि शब्दश्चतुर्धा विभज्य व्याख्यातः—प्रकृतिः—प्रत्ययः, उपसर्गः, निपातश्च। तथा चायं क्रियाशब्दोऽपि चतुर्धा द्रष्टव्यः—धातुः—विभक्तिः—विकरणमागमश्चेति। धातुः क्रियाशब्दस्य प्रकृतिर्भवति. क्रियारूपस्यार्थस्यावापोद्वापाभ्यां तत्रैव विश्रामात्। यः पदार्थो यदाधारेण स्वरूपं धत्ते स तत्र धातुरित्युच्यते—यथा पित्तवातश्लेष्माणस्त्रयो, रसासृङ्मांसमेदोऽस्थिमज्जशुक्राणि वा सप्त धातवो भवन्त्यध्यात्मम्—

यथा वा हेमरजतताम्राणि त्रीणि लौहादयः सप्त वा धातवो भवन्त्यधिभूतम्।

तथैव अस्-भू-कृादयः कतिपये शब्दभागा धातवो भवन्त्यधिशब्दम्। धात्वर्थश्च क्रिया नान्तरेण कारकाणि स्वरूपं धत्ते इति क्रियास्वरूपाभिव्यक्तिः कारकप्रतीतिसापेक्षा।

यतश्च कारकाणां क्रियासम्बन्धप्रत्ययो भवति स प्रत्ययभागो विभक्तिरित्युच्यते: एकैकस्य धातोस्तत एवानेकधा विभजनात्, भूयते. भवति, अभूद्, भविष्यतीत्यादिविभागस्य तदधीनत्वात्। यद्यपि तु प्रत्ययश्चैतन्यं नाम नानेकः, प्रकृतिरेव तु सत्त्वादितत्तद्गुणोद्रेकभेदादनेकधा भवति तद्भेदादेव चैकोऽपि चिदात्माऽनेकधा भिद्यते इति मतं शारीरकाणाम्।

अथापि प्राकृतिका अभिमन्यन्ते-सन्ति प्रत्ययायमानाः पुरुषा बहवः, प्रतिपुरुषं च भिद्यते प्रकृतिरिति। तदनुसारेणायं प्रकृतिप्रत्ययार्थो व्याख्यातः।

अथ शाब्दिका महामहिमानो विशदमतयः स्युर्नैषां दुराग्रहो नवा कैश्चिद्विसंवादो नापि वा शब्दार्थप्रागल्भ्यपरिसरहानिः। अक्षुब्धं ते शारीरकनयेऽप्याचक्षते शब्दव्यवस्थाम्-भवति हि लडेकः प्रत्ययः—स च प्रकृतिभेदादनेकधा विभज्यते जायते अस्ति वर्द्धते विपरिणमते अपक्षीयते नश्यति इत्येवमेकस्यैव लटोऽनेकधा विभागदर्शनादित्यास्तां तावत्।

अपर आह—यच्चेदमर्थजातं दृश्यते सर्वत्रैव हि तत्र द्वौ भागावबभासेते—चेतनश्च जडश्चेति। यतश्चिदंशः प्रतिपद्यते स चेतनः—स प्रकृतेः प्रत्ययो भवति। यतस्तु क्रिया स जडः स प्रत्ययस्य प्रकृतिर्भवति, अथैतयोरेवार्थभागयोः सर्वे शब्दा यथायथं सङ्केतिताः सन्ति। अत एव यावदिदं वाक्यजातं श्रूयते

सर्वत्रैव हि तत्र द्वौ भागावबभासेते क्रिया च चिदंशश्च। यतः क्रिया प्रतिपद्यते सा प्रकृतिः यतस्तु चिदंशः स प्रत्ययः।

ज्ञानजन्या भवेदिच्छा इच्छाजन्या कृतिर्भवेत्
कृतिजन्यं भवेत्कर्म्मेति— ... ...

तार्किकसिद्धान्तादवश्यम् चिदंशस्यैव कारकत्वेन प्रतिपत्तव्यतया रथो गच्छतीत्यादीनामौपचारिकत्वाभ्युपगमात्। अथवा तत्राप्यस्त्येव चित्सत्ता इन्द्रियाभावात्तु नोपलभ्यते इति मतम्। तस्माच्चिदंशाश्रयस्यैव कारकत्वेन भवितव्यम्। स प्रत्ययप्राधान्यात्प्रत्यय इत्युच्यते। या चात्र क्रियाशब्दात् संख्या प्रतीयते तया नूनं तत्कारकमेव विभज्यते न तु सा क्रिया। यथा पचन्ति-बहव एकां पाकक्रियां कुर्वन्तीति बहुत्वं कर्तृनिष्ठं प्रतिपद्यते न क्रियानिष्ठम्-तस्मात् कारकवाचकः स प्रत्ययभाग एव विभक्तिरित्युच्यते इति बोध्यम्। अथवा मास्तु चिदंशचर्चापि न बोपादानकारणस्य प्रकृतित्वम् किन्तु अन्यर्थेवेदं सर्वं व्याख्यास्यामः।

क्रिया हि सर्वस्य प्रकृतिः—तयैव सर्वस्य विकारलाभात्। तस्मात् क्रियावाचकः शब्दभागोऽपि प्रकृतिरित्युच्यते। अथवा यत्र कुत्रापि यस्य किञ्चिदुच्यते सा तत्र प्रकृतिः—तत्प्रकृत्यैव प्रक्रमणात्। क्रियाशब्दे हि क्रियामेव प्रकृत्य कारकत्वमाकृतेरिवोपरि दर्शयिष्यामः। तस्मा-

त्र क्रिया प्रकृतिः । तत्तादात्म्येन तत्र सङ्केतितः शब्द-भागोऽपि प्रकृतिर्वक्तव्या डित्थोऽयमित्यादिवत् । सा चेयं क्रिया यत्र यत्र प्रतीयते स प्रत्ययः, जडे चेतनेऽपि च तदुपलब्धिं पश्यामः । अतस्तद्वाचकः शब्दभागोऽपि प्रत्यय इत्युच्यते । यथा चान्यत्रापि सूर्य्यस्यापत्यं सौरिरिति भवति तत्र सूर्य्यस्यापत्यात्मकः सम्बन्धी वक्तव्यः इत्यतस्तत्र सूर्य्यशब्दः प्रकृतिः स चायं सूर्य्यो जनकत्वेनात्र तदपत्ये प्रतीत इत्यपत्यवाचकोऽयमिकारः शब्दभागः प्रत्ययो भवति एवमिहापि द्रष्टव्यम् । अस्याश्च क्रियायासम्भवद्रूपायाः सम्बन्धिनो विभागा वक्तव्याः । ते चाष्टधा प्रतिपद्यन्ते—भावः—कर्त्ता—कर्म—करणम्—संप्रदानम्—अपादानम्—सम्बन्धसामान्यवत्—अधिकरणं चेति ।

तत्र तद्वस्तुनः सद्भूपतया स्वरूपकीर्तनमात्रं भावः ॥१॥
यत्समवायेनोत्पन्ना चेष्टा स कर्त्ता ॥२॥
प्रयोजककर्तृसमवधाने प्रयोज्यः कर्त्ता कर्मेत्युच्यते ॥३॥
प्रयोज्यव्यापारप्रयोजकव्यापारयोरेकोद्देशेन प्रवृत्तौ तादृशः प्रयोज्यकर्त्ता करणमित्युच्यते ॥४॥
चेष्टाया उद्देश्यभूतोऽर्थः संप्रदानम् ॥५॥
चेष्टायामपेक्षितः पूर्वावधिरपादानम् ॥६॥
चेष्टायाश्चेष्टाकर्त्रादीनि वा सम्बन्धसामान्यधर्मेण प्रतीयमानोऽर्थः सम्बन्धी ॥७॥

क्रियाकर्तृसम्बन्धिदेशकालाकाशव्याप्यदेशकालाकाशावच्छिन्नमधिकरणम् ॥८॥

एतेषां च सम्भवद्रूपाणां सिद्धरूपाभिधायकैर्नामशब्दैरभिनेतुमनर्हाणां प्रत्ययजनकाः शब्दभागा विभक्तय इत्युच्यन्ते—क्रियासम्बन्धिविभागावभासकत्वात् ।

ताश्च विभक्तयो द्वेधा भवन्ति—क्रियासम्बन्धेनाभिनीयमानाः—द्रव्यसम्बन्धेनाभिनीयमानाश्च—'रामकृष्णौ गच्छतः'—इत्यत्र औकारोऽपि विभक्तिः तश्शब्दोऽपि विभक्तिः—तयोरेकस्यैव कर्तृकारकस्याभिधायकत्वात् । किन्तु औकारः प्रकृते रामकृष्णयोः कर्तृकारकत्वमस्तीत्याह । तश्शब्दस्तु प्रकृते गमनक्रियानिरूपितं कर्तृकारकत्वमस्तीत्याहेति विशेषः ।

तदित्थं द्रव्यसम्बन्धेनाभिनीयमानाः विभक्तयोऽपि-सम्बुद्धिः—प्रथमा—द्वितीया—तृतीया—चतुर्थी—पञ्चमी—षष्ठी—सप्तमीत्याख्याभिरष्टधा व्याख्याताः । तत्र सम्बुद्धेः क्रियासम्बन्धिविभागावभासकत्वाभावेऽपि विभक्तित्वव्यवहारः—सादृश्यादुपचारात् ।

अथ क्रियासम्बन्धेनाभिनीयमाना विभक्तयस्तु त्रयैव भवन्ति भावः कर्त्ता-कर्म चेति भेदात् । नहि धातोः परतः करणादिविभक्तयो दृष्टाः-क्रियायाः स्वस्वरूपलाभे भावकर्तृकर्मणोरेव प्रत्ययशक्तिकर्तृत्वोरपि करणादिभिरनुपनु-

स्थानात् । तत्र भावो नाम प्रकृते क्रियावस्तुनः सद्रूपतया स्वरूपकीर्तनमात्रम्, तत्र क्रियायाः स्वमुखेनैव प्रवृत्तिः । कर्तृविभक्तौ तु कर्तृमुखेन कर्मविभक्तौ च कर्ममुखेन तस्याः प्रवृत्तिर्द्रष्टव्या ।

अत्रायमभिसन्धिः— क्रियायां संकेतितः शब्दभागो धातुरित्युच्यते क्रियामुखेनैव सर्वत्र प्रायेण शब्दानां प्रवर्तमानतया शब्दाभिधेये क्रियाया धातुत्वेन शब्दस्वरूपसिद्धावपि क्रियावाचकांशस्य धातुत्वेन प्रतिपन्नत्वात् सा च क्रिया यद्यपि सर्वत्र चेष्टारूपैकैव भवति, अथापि प्रकरणभेदात् चेष्टाया नानात्वेन नामक्रियाधात्वर्थाः प्रतिपद्यन्ते ।

किञ्च न केवलं क्रिया एव अपि तु क्वचित् क्वचित् तत्तत्क्रियायां विशेषणीभूता अन्येऽपि बहवः पदार्थाः क्रियाकारकादिरूपास्तत्तद्धातुवाच्यतावच्छेदककुक्षौ प्रविष्टा भवन्ति तत्तदर्थविशेषितक्रियायामेव तत्तद्धातोः संकेतग्रहणात् । तादृशधात्वर्थतावच्छेदककुक्षौ सामान्यरूपेणोपात्तैस्तत्तदर्थैरुत्थापिताकांक्षानिवर्तकतया प्रत्युत्थापिता एवार्थाः कारकशब्देनाभिधीयन्ते। तत्र धातुनिष्ठैकार्थकक्रियाकारकाणामनेकत्तत्क्रियाणां भावभावनोत्पादनाख्यानां सत्त्वे प्रधानभावनासमवायी कर्तेत्युच्यते । ततो या विभक्तिः सा प्रथमा, तत्समभिव्याहृतधात्वर्थद्वितीयभावना समवायी कर्मेत्युच्यते । तत्र या विभक्तिः सा द्वितीया । तत्तत्समभिव्याहृतधात्वर्थतृतीयभावनासमवायी करणमित्युच्यते, ततो या विभक्तिः सा तृतीया । तदित्थमर्थोपस्थितिविप्रकर्षक्रमानुरोधिन्यास्तास्ता विभक्तयश्चतुर्थ्यादिसंज्ञा भजन्ते इति द्रष्टव्यम् ।

तत्तद्धातुसम्बन्धे विभक्त्युदाहरणानि

तथाहि, चरगतौ-अस्य गृह्यमाणदेशत्यागोऽर्थः । चर-गृह्यमाणदेशं त्यजेत्यर्थः । चल गतौ-अस्य वक्तृगतिसापेक्षो गृह्यमाणदेशत्यागोऽर्थः चल-गृह्यमाणदेशं त्यजेत्यर्थः, तत्राहमप्यागच्छामीत्यर्थध्वनिः । गम् गतौ-अस्य गृह्यमाणदेशावधिकोत्तरदेशग्रहणमर्थः । तत्र ग्रहणं नाम संयुञ्जानस्यापरस्य संयोगकर्मसिद्धये आत्मसमर्पणेन विषयीभवनम् । यद्यपि यो गृह्णाति, सोऽपि युञ्जान एव भवति, तस्मा अप्यात्मानं समर्प्य विषयीभवन्त्यन्ये । तथापि न सोऽत्र गम्धात्वर्थः । गमा तु स्वकर्तुरेवात्मसमर्पणेन विषयीभवनमभिधीयते । ग्रामं गच्छ-ग्रामः संयुञ्जानः, स च त्वदात्मकविषयालाभात् संयोगायात्मं इत्यतस्तत्संयोगकर्मसिद्धये त्वमात्मसमर्प्पणेन विषयीभवेत्यर्थः । धात्वर्थतावच्छेदककुक्षिप्रविष्टोऽथमुत्तरदेशो देशत्वसामान्यधर्मोपात्तस्तत्र विशेषात्मको भवति, यथा प्रकृते ग्रामात्मकः । सोऽपि गमधातूपात्तक्रियाकर्तैव । किन्तु गमधातूपात्तप्रधानक्रियाप्रयोज्यक्रियाकर्तृत्वात् प्रधानकर्तुः प्रथमया कारकविभक्त्या प्रयुज्यमानस्य समभिव्याहारे सोवान्तरक्रियाकर्त्ता द्वितीयया कारकविभक्त्या प्रयुज्यते । ग्रामस्त्वया संयुनक्तु, तत्र

च त्वं विपर्यीभवन् प्रयोजयेत्यर्थे त्वं ग्रामं गच्छेति प्रयोगः। एवमेवान्यत्रापि सर्वत्र धातूपात्तक्रियायाः प्रकारभूतायाः प्रधानक्रियाप्रयोज्यायाः कर्तरि द्वितीया कारकविभक्तिरुन्नेया।

एवं विक्लेद्यसाधनं पच्-धात्वर्थः। तत्र क्रियात्रयी वाच्या-विक्लित्ति-सिद्धि:-तदनुकूलक्रियाकलापश्च। अत एवात्र प्रयोज्यक्रियाया द्वैविध्यात्तत्क्रियाकर्तृभूतयोस्तन्दुलौदनयोरुभयोरपि द्वितीयया कारकविभक्त्यैव प्रयोगः। तन्दुलमोदनं पचति देवदत्तः-यथा तन्दुलं विक्लित्तिं, ओदनं सिद्ध्यति, तथा चेष्टते देवदत्त इति कृत्वा तन्दुलं विक्लेद्य ओदनं साधयतीत्यभिप्रेत्य तन्दुलमोदनं पचति देवदत्त इत्याह। एवमेव अनेकप्रयोज्यक्रियार्थो धातवो द्विकर्मका उच्यन्ते।

अथ प्रयोज्यत्वसामान्येऽपि यादृशप्रयोज्यक्रियाया उद्देश्येन प्रयोजकप्रवृत्तिः, तादृशक्रियाकर्तुरेव द्वितीयकारकत्वम्, किन्तु यादृशप्रयोज्यक्रियायाः प्रयोजकव्यापारोद्देश्यत्वं न विवक्ष्यते, तादृशप्रयोज्यक्रियाकर्त्तृ तृतीयकक्षाकं कारकत्वमभिप्रेयते-इत्यतस्तत-स्तृतीया कारकविभक्तिः प्रयुज्यते, यथा यज्ञदत्तो देवदत्तेनान्नं पाचयतीत्यत्र देवदत्तव्यापारवद्यज्ञदत्तव्यापारोऽपि अन्नपचनमेवोद्देश्यभूतम्, न तु देवदत्तव्यापारसिद्धिः प्रयोजकव्यापारः वृत्त्युद्देश्या इत्यतस्तस्मात्तृतीया विभक्तिः। रामो बाणेन बालिनं हन्ति इत्यत्राहत्य प्राणत्याजनं हन्धात्वर्थः। तत्र बाली प्राणांस्त्यजति,

तत्राहन्तृव्यापारः प्रेरयति। अत्राहननमेव बाणव्यापारो विवक्षितो न प्राणत्याजनमपीति न बाणो हन्तीति प्रयोगः। तदित्थं बाणो बालिनमाहन्ति, बाली प्राणांस्त्यजति, तदुभयमप्यन्यो रामः प्रयोजयति स हि बालिनमाहन्तुं बाणं प्रेरयति, प्राणांस्त्यक्तुं बालिनं प्रेरयति इति रामो बाणेन बालिनमाहत्य प्राणांस्त्याजयति। तदेतदर्थं आह रामो बाणेन बालिनं हन्तीति। तत्र बालिकर्तृकप्राणत्यागवदेव बाणकर्तृकाहननस्य प्रयोज्यक्रियात्वेऽपि प्राणत्यागोद्देशेनैव तत्रापि प्रवर्तमानतया नाहननकर्तुर्बाणस्य द्वितीयकक्षाकं कारकत्वं युक्तमतोऽनुद्देश्यत्वेन बुद्धिविप्रकर्षात्तस्य तृतीयकक्षाकं कारकत्वमध्यवसीयते, ततो या विभक्तिः सा तृतीया।

अथवा यत्रैकयैव क्रियया यत्किञ्चित्समवेतया परस्यापि तत्सम्बन्धिनः क्रियावत्त्वम् न तु क्रियान्तराश्रयत्वं विवक्षितं स्यात, तत्र प्रधानस्य तत्क्रियासमवायिसम्बन्धप्रतियोगिनः प्रथमकारकत्वम्, तत्क्रियासमवायिनस्तु तृतीयकारकत्वं द्रष्टव्यम्। रामो बालिनं बाणेन हन्तीत्यत्र बाणनिष्ठा बालिप्राणत्याजनक्रिया एव रामनिष्ठा विवक्षिता, रामस्य तु स बाण इति रामः प्रथमकारको बाणस्तु तृतीयकारकः। एवं रामचक्षुर्निष्ठदर्शनक्रियैव रामनिष्ठा दर्शनक्रियेति, तत्र रामः प्रथमकारकश्चक्षुस्तृतीयकारको रामश्चक्षुषा पश्यतीति, सेनाकर्तृकयुधिक्रियैव राजकर्तृका युधिक्रिया इति राजा प्रथमकारकः सेना तृतीयकारकः-सेनया युध्यति इति। एवमन्यत्रापि द्रष्टव्यम्।

अथ स्वामिस्वत्वपरित्यागेन परस्वत्वग्रहणं दा-धा
तत्रापि तिस्रः क्रियाः स्वामिस्वत्वपरित्यागः १ परस्वत्वग्रहण
तदुभयानुकूलक्रियाकलापश्च ३। राजा विप्राय धनं ददाती
धनं राजस्वत्वं परित्यजति, विप्रस्वत्वं च गृह्णाति, तदुभयत्र
प्रयोजयति-इत्यर्थे प्रयोज्यक्रियाकर्मानुयोगिकसम्बन्धप्रतियोगि
चकाच्छब्दाच्चतुर्थी विभक्तिः। यदि त्वत्रैव स्वामिस्वत्वान्नि
परस्वीकारसाधनं धात्वर्थोऽभविष्यत्, तदा स्वामिस्वत्वान्निव
नाय धनस्येव धनस्वीकर्तुर्विप्रस्यापि द्वितीयकारकत्वमभविष
विप्रं धनं ददातीति। धनस्वीकारस्यानुद्देश्यत्वे वा धनस्वीका
र्तृतृतीयकारकत्वमभविष्यत विप्रेण धनं ददातीति। न
दृश्यते। तस्मान्न तथार्थः। यत्र तु विभक्तिद्वैधं दृश्यते, तत्रा
मनयैव दिशा धात्वर्थद्वैधमुन्नेयम्।

अत्र गृह्यमाणदेशावधिकोत्तरदेशग्रहणं गम्धात्वर्थ उ
तत्र गृह्यमाणदेशविशेषो ग्रामादिरेव, तत्रापादानसंज्ञः पञ्चमका
भवति। तथा च धात्वर्थान्तःप्रविष्टानां दिक्कालाद्यवच्छेदक
सम्बन्धाकाङ्क्षानिर्वर्तकमपादानं वक्तव्यम्--, ततो या विभक्तिः
पञ्चमी। ग्रामाद् गच्छति इति। ग्रामादागच्छतीत्यादौ त्वयमा
रोपसर्गस्तस्य ग्रामावधिकोत्तरदेशस्य वक्त्रपेक्षयार्वाचीनत्वं प्र
पादयति। ग्रामावधिकोत्तरदेशं वक्तृसन्निहितं गृह्णातीत्यर्थ
तथा च वक्तुर्ग्रामस्थत्वे ग्रामाद्वनं गच्छतीति प्रयोगः, वक्तु
स्थत्वे तु ग्रामाद्वनमागच्छतीति प्रयोगः। ग्रामाच्चलित इत्यादि

णदेशप्रतियोगिकसंसर्गत्यागस्यैव चलधात्वर्थतया ग्रामप्रति-
संसर्गत्याग एवानित्यर्थं प्रतियोगिसाकाङ्क्षसंसर्गप्रतियोग्याका-
ङ्क्षकौ ग्रामो अपादानं भवतीत्येवं सर्वत्र द्रष्टव्यम्।

इत्थमिदानीं यावद् धात्वर्थतावच्छेदककुक्षौ सामान्यधर्मो-
मेव तेषां तेषां प्रधानक्रियां प्रत्यपेक्षितानां बुद्धिसन्निकर्ष-
तारतम्येन प्रथम-द्वितीय-तृतीय-चतुर्थपञ्चमकारकत्वमाचार्यैः
रिन्द्रादिभिरभ्यूहितम्। येषां पुनः क्रियास्वरूपलाभाय नो-
कांक्षा, अथापि क्रियां प्रति तत्क्रियाकारक प्रत्यपि वा सम्ब-
नान्वियन्ति, ते षष्ठकारकाः सप्तमकारका वा भवन्ति, तेभ्यः
सप्तमी वा विभक्तिः प्रयुज्यते। यथा मातुः स्मरति। मातुः
स्मरति। ग्रामे आस्ते। ग्रामे देवदत्तः पीनो भवति। साधुः
मातुले इत्यादि। तदिदं सर्वं नामप्रकरणे निरूपित द्रष्टव्यम्।

इह पुनरेतावदेवोच्यते एषु धातुत्वेन प्रतिपन्नेषु शब्दवि-
केचन विशुद्धैकक्रियार्थाः इतरे इतरविशेषितक्रियार्थाः सन्ती-
यपि क्रियाशक्तीनां धातूनां वाच्यतावच्छेदककुक्षौ द्रव्यादीनां
खल्वपि नावकल्पते, अथापि क्रियाणामेवानेकासां प्रवेश-
त्र तत्तत्क्रियास्वरूपावगमायापेक्षितानि द्रव्यादीनि नान्त-
सा सा क्रिया धातुनिष्ठाशक्ति निरूपयतीति विशेषणविधया
र्थप्रवेशोऽप्यवकल्पते एव। भवति हि गलादधःप्रवेशानुकूल-
प्रयत्नः स्थैर्यः, तथा च यथान्न गलादधः प्रविशेत्, तथा चेष्टते

इत्यभिधातुमन्नं भुङ्क्ते इत्याह । तत्र प्रवेशात्मकक्रियायामपेक्षित-मर्थमवगमयितुमवश्यं गलाद्यर्थप्रवेशः कर्तव्यो भवतीत्येवमन्य-त्रापि द्रष्टव्यम् । तथा च द्रव्यादिभिर्विशेषिताप्यविशेषिता वा क्रिया एकानेका वा धात्वर्थ इति सिद्धम् ।

धात्वर्थनिर्वचनम्

सर्वे च धातव इतरविलक्षणक्रियार्थाः नैकस्यापि धातोः सा-कल्येन पर्यायः कश्चिदन्यो धातुर्भवतीत्यपि द्रष्टव्यम् । तथाहि— अस्-भू-कादयः शब्दा धातवो भवन्ति । तत्र अस्शब्दः सत्तामा-त्रार्थः । सत्ता ह्येका नित्या उत्पत्तिक्षयविसंवादिनी क्रिया भवति । तत्रेतरक्रियाणां विशेष्यविशेषणाभावापोहितत्वात्केवलं कर्तर्येव विभक्तयो भवन्ति, न कर्मणि, नापि भावे । अस्तीत्यस्य सत्तावा-नित्यर्थः । अथ तादृशसत्ताधानं भूधात्वर्थः । भवति इत्यस्य सत्तां धत्ते इत्यर्थात् । धाधात्वर्थश्चावलम्बनम् । तत्र द्वे क्रिये— एकावस्थानलक्षणा, अपरा तदनुकूलचेष्टालक्षणा च, समग्रास्ता-स्तिस्रः क्रिया भूधात्वर्थः सिद्धः । घटो भवतीत्यत्र घटे सत्तावल-म्बते, घटश्च तदनुकूलचेष्टावानित्यर्थः । यथा सत्ता स्वस्मिन्नव-लम्बते । तथा चेष्टते घट इति वार्थः । यत्तु सत्तावलम्बनानुकू-लचेष्टाकाले घट एवाप्रसिद्ध इति धात्वर्थो नावकल्पते इति ब्रूयात् तत्रेदं वक्तव्यम्, कार्यकरणयोरभेदव्यवसायेन भविष्यतः कार्य-

स्य तदुपादाने उपचारादीदृशानां प्रयोगाणामुपपत्तिर्भवति । अस्य सूत्रस्य शाटकं वयेत्यादिवत् । अथवा सत्तावलम्बनानुकूलचेष्टासु युक्तमेव घटस्याप्रसिद्धत्वम्, यदि नाम घटः सन् स्यात्, किमिति पुनः सत्तावलम्बनानुकूलं चेष्टेत । तस्माद् बुद्ध्या मृदध्यस्तोऽस-न्नेव घटः सत्तामवलम्बितुं चेष्टते इति बोध्यम् । असतः सज्जा-यते इति सिद्धान्तात् ।

अथवा समवायेन सिद्धिर्भूधात्वर्थः । मृत्तिका घटो भव-तीति वदन् मृत्तिका समवैति घटः सिद्ध्यति इत्याह । सिद्धिर्हि नाम प्रागभावध्वंसानुकूलचेष्टा । तेन मृत्तिका अनुगच्छति, घटः स्वप्रागभावध्वंसानुकूलं चेष्टते इत्यर्थः । अत्रापि भविष्यन्तं बुद्धि-स्थं घटमभिप्रेत्य चेष्टेति प्रयोगः ।

शारीरिकनये तु नास्ति द्रव्यं नामातिरिक्तः कश्चन पदार्थः किन्तर्हि गुणकूटे द्रव्यशब्दः प्रवर्तते । तथा च नास्ति घटो नाम कश्चन द्रव्यविशेषः, किन्तु रूपविशेषवत्समवायः स इति ज्ञेयम् । सन्ति हि मृत्तिकासु बहवो गुणाः—तत्रैको रूपविशेषः कपालशब्द-प्रवृत्तिनिमित्तभूतोऽपवर्तते, तदतिरिक्तं च विलक्षणं रूपमावि-र्भवति,—अन्ये गुणास्तदवस्थाः । ततश्चैकगुणातिरेकादेवाय समवा-यः पूर्वस्मात्कपालादिशब्दवृत्तेः समवायादन्यः प्रतिपद्यते इति तस्य समवायस्य घटसंज्ञा भवति । तद्गतश्च तत्समवायभेदप्रयोजकः पूर्वेभ्यस्तद्गुणरहितेभ्य इव यस्य वृत्तिर्निश्चितम्, न त्वतिरिक्त-

कथन जातिर्नाम पदार्थः प्रतिपत्तुं युज्यते । समवायश्च नाम अयमेकः अयमेकः अयमेक इति इमे बहवः सन्निहिताः सोऽयमेक इत्याकारा परस्परसन्निकर्षेणानेकेषां गुणानां युगपद्ग्राहिणी बुद्धिरिति गुणसमवायोऽपि गुण एव । स एव समवायस्तत्तद्गुणानुगतबुद्धिविशेषरूपो द्रव्यशब्देन घटादिशब्दैश्चाभिनीयते इति समवायसम्बन्धोऽपि नार्थान्तरम् । तद्गुणनिबन्धना च शब्दप्रवृत्तिरिति गुणोपचयापचयनिबन्धनास्ते ते नामाख्यातशब्दाः प्रवर्तन्ते च निवर्तन्ते च । तथाच तद्रीत्या परिणम्य सिद्धिर्भूधात्वर्थो वक्तव्यः । तत्रापि सिद्धिर्नाम न प्रागभावध्वंसो भवति-

नासतो विद्यते भावो नाभावो विद्यते सतः ।
उभयोरपि दृष्टोऽन्तस्त्वनयोस्तत्त्वदर्शिभिः ॥

इति कृत्वा प्रागसतो घटादेरुत्पादासंभवात्, अपि तु-तत्तद्गुणविशेषितसमवायावच्छिन्नायाः सत्ताया इतरगुणविशेषितसमवायावच्छिन्नत्वेन बुद्ध्यनुग्रहः सिद्धिशब्दार्थः । तथा तत्तद्गुणविशेषितसमवायावच्छिन्नायाः सत्तायास्तत्तद्गुणविशेषितसमवायावच्छिन्नत्वबुद्धिः परिणामः । मृत्तिका हि यावद्गुणविशेषितसमवायरूपा बुद्ध्या गृह्यता, तदवच्छिन्ना सत्ता घटशब्दप्रभृतिनिमित्तारूपविशेषस्य तद्बुद्ध्यनुग्रहे नेदानीं तावद्गुणविशेषितसमवायावच्छिन्ना तिष्ठति, अन्यूनानतिप्रसक्तधर्माणामेवावच्छेदकत्वात् तावतारूपेण मृत्तिकाख्यसमवायावच्छिन्नायाः सत्तायाः

घटत्वाख्यगुणविशेषविशेषितघटाख्यसमवायावच्छिन्नत्वं बुद्ध्यानुगृहीतमेव घटस्य भावः । ततो मृत्तिका परिणम्य घटो भवतीत्यभिवक्तुं मृत्तिका घटो भवतीति प्रयुञ्जते ।

अथवैतदन्यथा व्याख्यास्यामः । इयमेका इति बुद्ध्यानुगृहीता सत्तैव गुणानां समवायो द्रव्यं च प्रतिपद्यते । सा च बुद्धिर्गुणरूपविषयभेदाद्विद्यते-इत्यनेके समवाया अनेकानि च द्रव्याणि संभवन्ति । अत्र स्वरूपसद्रूपा गुणा बुद्धिभेदकाः न तु ज्ञायमानाः, तत्तद्गुणानामज्ञानेऽपि गुणान्तरप्रवेशे विलक्षणबुद्ध्युदयदर्शनात् । तथा च तत्तद्गुणानुगतैकत्वबुद्ध्यवच्छिन्ना सत्तैव द्रव्यमिति वक्तव्यम् ।

तत्र गुणा द्विविधाः-तद्द्रव्यनित्याः तद्द्रव्यानित्याश्च । यद्गुणोपक्षये तद्द्रव्यत्वबुद्धिहानिः, ते तद्द्रव्याव्यभिचारिणो नित्यगुणा उच्यन्ते-घटत्वपटत्वादयः । अथ यद्गुणोपक्षयेऽपि तद्द्रव्यत्वबुद्धिरनुवर्त्तते, ते नूनं व्यभिचारिणो गुणा अनित्या उच्यन्ते नीलपीतादयः । इयं चैकत्वानेकत्वबुद्धिर्व्यवहारिकी दृश्यते लोके । वस्तुगत्या तु यत्किञ्चिद्गुणोपक्षयमात्रेण स समवायो विहन्यते इति बोध्यम् । अत एव घटो ध्वस्त इतिवद्दण्डी ध्वस्तः, कुण्डली नास्तीत्यादयो व्यवहारा अपि दण्डकुण्डलादिगुणोपक्षयनिबन्धना दृश्यन्ते । सर्वे च गुणाः सर्वत्र कुतश्चित्समवायाद्वियुज्यन्ते, कुत्रचित्तु समवाये संयुज्यन्ते इति

जगतः स्वभावः। तत्र सर्वोऽपि समवायः-कंचिदव्यभिचारिणं नियमेन विषयीकृत्य प्रवर्तमानो यथेच्छं तत्रत्यगुणान्तरं विषयीकृत्यापि व्यपदिश्यते, यथा घटत्वगुणविशिष्टः समवायो घटत्वं गुणविशेषं घटाख्यं विषयीकृत्य प्रवर्तमानो घट इति व्यपदिश्यते, नीलत्वं गुणविशेषं नीलाख्यं विषयीकृत्य नील इति व्यपदिश्यते। एवं ह्रस्वत्वगुरुत्वादिपुरस्कारेणापि द्रष्टव्यम। अत्र यद्यपि घटनीलादयः शब्दा गुणविशेषाणामेव वाचकाः अथापि यद्गुणं पुरस्कृत्य स समुदायोऽभिनीयते तत्र घटनीलादयः शब्दाः, ये तु प्रकारत्वेन विवक्षितास्तत्र घटत्वनीलत्वादिशब्दा व्यवह्रियन्ते-इति प्रयोक्तृसमयो न तु वस्तुभेदः तत्तद्गुणपुरस्कारेणैव च स स शब्दस्तत्र तत्र सङ्केतित इति तत्समवायान्नीलगुणोपलब्धे नीलशब्दहानिः, घटगुणोपलब्धे च घटशब्दहानिः। अतिरिक्तगुणसमावेशे च तद्गुणनिबन्धनशब्दप्रवृत्तिरिति गुणोपचयापचयनिबन्धनाश्चैते नामाख्यातशब्दाः प्रवर्तन्ते च निवर्तन्ते च। तथा च व्यभिचारिगुणानां निवृत्त्यनुवृत्तिप्रवृत्तिषु तद्द्रव्यसमुदायभेदोऽवस्थाशब्देन व्यपदिश्यते। नीलो घटः रक्तो घट इत्येकस्मिन्नेव घटेऽनेकथा व्यवहारात्। अथाव्यभिचारिगुणानां निवृत्त्यनुवृत्तिप्रवृत्तिषु क्रमेणावस्थाभेदस्य नामसु नाम्नां प्रवर्तन्ते। घटो नश्यति इत्यत्र घटत्वमेकगुणं घटात्समवायात्निवर्तते इत्यर्थः, घटोऽस्तीत्यत्र तु स गुणस्तत्समवायेऽनुवर्तते इत्यर्थः। अव्यभिचारिगुणानामवच्छेदकविषया सत्तायामनुवर्तनेयास्वाद्यर्थत्वात्। एतेन इय-

मेका इति बुद्ध्यनुगृहीता घटत्वाद्यनेकगुणव्यासज्यवृत्त्यवच्छेदकत्वनिरूपिता सत्तैव घटपदार्थ इत्यभिमन्यमानानां घटोऽस्तीति प्रयोगानुपपत्तिः-सत्तायाः सत्तावृत्तित्वप्रतिपादनायोगादित्याद्दोषो निरस्तः। घटत्वमव्यभिचारिगुणोऽवच्छेदकत्वेन सत्तायामनुवर्तते, इत्यर्थतया घटोऽस्तीति प्रयोगस्योपपादितत्वात। यत्तु घटत्वाद्यनेकगुणव्यासज्यवृत्त्यवच्छेदकत्वनिरूपिका सत्ता घटपदार्थः, घटत्वमव्यभिचारिगुणोऽवच्छेदकत्वेन सत्तायामनुवर्तते इत्यस्तिपदार्थः, तयोरन्वयानुपपत्त्या घटोऽस्तीतिप्रयोगानुपपत्तिरद्यापि तदवस्थेति कश्चित् प्रत्यवतिष्ठेत, तत्तुच्छम, सर्वेषामेव धातूनां पर्यायपरिवृत्त्यसहत्ववत्सर्वेषामपि पदानां प्रायेण पर्यायपरिवृत्त्यसहत्वाभ्युपगमाद्धवदभ्युपगतरीत्या पदार्थान्वयानुपपत्तावपि घटत्वाद्यनेकगुणव्यासज्यवृत्त्यवच्छेदकत्वनिरूपिकायां सत्तायां घटत्वमवच्छेदकत्वेनानुवर्तते-इति विशिष्टार्थे घटोऽस्तीतिविशिष्टस्य सङ्केतग्रहेण तत्प्रयोगोपपत्तेरव्याहतत्वात, घटशब्दे गृहीतेऽपि बोधव्यकत्वग्रहे तत्सम्बन्धग्रहणाय घटोऽयमित्यादिवाक्यप्रयोगवत। अथवा अस्तीत्येतत्प्रयोगानुरोधात प्रकृते विशेष्यविशेषणभावव्यत्यासेन घटादिपदार्थाः परिष्कार्य्याः। यथा हि-इयमेका इतिबुद्ध्यनुगृहीतसत्ता. वच्छेदकोऽनेकगुणसमुच्चितघटत्वगुणो घटपदार्थः। सत्ताश्रयत्वमस्तिपदार्थः। सत्ताश्रयत्वञ्च सत्तावच्छेदकत्वेनानुवृत्तिः। तथा च एकत्वबुद्ध्यनुगृहीतसत्तावच्छेदकानेकगुणसमुच्चितघटत्वगुणः सत्तावच्छेदकत्वेनानुवर्तत इति घटोऽस्तीत्यस्यार्थः प्रतिपद्यते इति

निष्कर्षः। यत्तु सत्तावच्छेदकत्वेन गृहीते तादृशघटत्वगुणे सत्तावच्छेदकत्वविधानं नोपयुज्यते इत्यरितप्रयोगवैयर्थ्यापरिहारेति व्याख्यातः तत्रेदं वक्तव्यम्। प्रकरणाद्यपेक्षे हीदृशः प्रयोगः प्रवर्तते-इतरगुणविधानार्थं सत्ताविधानार्थं च। यथा 'अयं घटः' 'घटोऽयम्'। नीलो घटः'-इत्यादिषु हि घटशब्दसम्बन्धं-नीलादिगुणा विधीयन्ते,-तत्र कामचारः। चक्षुरादिना गृहीतं व्यक्तिविशेषमुद्दिश्य घटशब्दं विधातुं प्रवर्तमानो यदीच्छेत्—विधेयतावच्छेदकबुद्धौ तदितरं गुणमप्रवेश्य घटशब्देनैकं विदध्याम, सोऽस्तिप्रयोगमनपेक्ष्यैवायं घट इति ब्रूयात्। अथेच्छेत् इतरगुणसमुच्चितघटत्वगुणे इदन्त्वेन गृहीते घटशब्दं सत्तावच्छेदकत्वेनानुवृत्तिं च सहैव विदध्याम्-सोऽस्तिना संप्रयुज्य अयं घटोऽस्तीति ब्रूयात्। एवमेव घटोऽयमित्यत्र घटशब्दमुद्दिश्य तदुबोध्यत्वमात्रं शब्दसत्तया समवायसत्तया वा समुच्चित्य वा विदधानो विवक्षानुरोधेन घटोऽयम् घटोऽयमस्तीति वा प्रयुञ्जीत। एवं घटो नीलः, घटो नीलोऽस्तीत्यादिषु द्रष्टव्यम्। अथ सत्ताविधानमपि द्वेधा-देशावच्छेदेन कालावच्छेदेन च, तयोरन्तिमाऽवश्यं भाव्यम, 'अत्र घटोऽस्तीति' इदानीं घटोऽस्तीति।

इदं तु बोध्यम, अत्रत्यदेशकालयोः क्वचित्प्रकरणादिनाऽवगतयोः सतोरत्रेदानींशब्दावप्रयुज्याप्यस्ति घट इति प्रयुञ्जते, तद्यथायथमुन्नेयम्। तदित्थं सन्त एव गुणाः प्रतिविधीयन्ते वाक्येन, विज्ञानेन त्वसन्तः। तथा च घटत्वगुणनिवृत्यादिना कथञ्चिद् गृहीतेन घटनाशः प्राप्तस्तत्र तज्ज्ञानापनोदेन सत्तावच्छेदकेऽपि घटत्वगुणे

सत्तावच्छेदकत्वेनानुवृत्तिमभिव्यक्तुं घटोऽस्तीत्याहेति नास्तिप्रयोगवैयर्थ्यम्। एवमेव तत्तत्पदार्थानुगततत्तद्गुणस्य निवृत्त्यनुवृत्तिप्रवृत्तिप्रतिपादनोद्देशेनैव सर्वे क्रियाशब्दाः प्रवर्तन्ते इत्यनुसन्धेयम्।

अथ यस्मिन् समवाये तद्द्रव्येतरद्रव्यत्वबुद्धिसमर्थको नित्यगुणः प्रवर्तते, तत्र भवतिप्रयोगो भवति-मृत्तिका घटो भवति, 'तन्तवः पटो भवति इत्यादि'। तत्र मृत्तिकाशब्दगृहीतसमवाये घटशब्दप्रवृत्तिनिमित्तगुणविशेषसमावेशात्तद्गुणवैशिष्ट्येन समवायस्यापूर्वत्वं भूधातुनाभिधीयते, तथा च सत्तावच्छेदकत्वेन प्रवृत्तिर्भूधात्वर्थः अनुवृत्तेरेवापूर्वत्वे हि प्रवृत्तिशब्दः। अत्र मृत्तिका घटो भवतीत्युच्यते, तत्र मृत्तिकामनूद्य घटभावो विधीयते। तथा च मृत्तिकासमवाये घटत्वगुणः। घटनिष्ठसत्तावच्छेदकत्वेन प्रवर्तते इत्यर्थः। अथवा मृत्तिकासमवायो घटत्वगुणनिष्ठसत्तावच्छेदकत्वावच्छिन्नप्रवृत्तिमानित्यर्थः समुन्नेयः। यत्र घटो नीलो भवतीत्युच्यते, तत्र घटसमवायो नीलगुणनिष्ठसत्तावच्छेदकत्वावच्छिन्नप्रवृत्तिमानित्यर्थः। यत्र तु केवलं घटो भवतीत्येवोच्यते, तत्र घटमनूद्य भवतीत्येव विधीयते, तथा च इतरानेकगुणसमुच्चितघटत्वगुणः सत्तावच्छेदकत्वेन प्रवर्तते इत्यर्थाद्यथाकथंचिद् घटोऽस्तीत्यनेन समानार्थता। एवमेव विवक्षानुरोधात्तत्र तत्र यत्किञ्चिद्वैलक्षण्येनार्थाः प्रवर्तन्ते इति तत्र तत्र समुन्नेयम्।

अथ यः कश्चिदेव भूधात्वर्थो निरूपयितव्यः तदनुकूलचेष्टायोजकधर्मरूपा कृतिरर्थः स्यात्। घटो भवति भवन्तं घटं चैत्रः

प्रेरयतीति चैत्रो घटं करोति । अथवा घटं करोतीत्यस्य यथा घटो भवेत् तथा चेष्टते इत्यर्थः । तथा चात्र धात्वर्थे चेष्टया मुख्यक्रियात्वात्तदाश्रयः प्रथमकर्ता स्यादिति ततः प्रथमा विभक्तिः । यस्तु तत्र प्रकारीभूतो भूधात्वर्थस्तत्क्रियाश्रयो द्वितीयकर्त्ता स्यादिति ततो द्वितीया विभक्तिः-'घटं करोति चैत्रः' इति । तदित्थमस्धात्वर्थगर्भितो भूधात्वर्थः भूधात्वर्थगर्भितश्च कृधात्वर्थः । यथा घटः स्यात्तथा घटश्चेष्टते, यथा च घटस्तद्रूपेण चेष्टेत, तथा चेष्टते कुम्भकार इति प्रतिपत्तेः । यत्तु चेष्टा कृत्यर्थीना, कृतिस्तु चेतननिष्ठैवेति घटस्य चेष्टनमसम्भवीति कश्चिदाक्षिपेत, तदसत् । चेष्टायाश्चेष्टानुकूलशक्त्यर्थानत्वेऽपि कृत्यर्थीनत्वे प्रमाणाभावात्, शक्तेश्च तथाविधायाः सर्वत्रैवानुगतत्वात् सर्वस्येवार्थजातस्य चेष्टाश्रयत्वसंभवात् । अत एव रथो गच्छति, पाषाणः पतन्ति, नदी वहतीत्यादयः प्रयोगाः स्वारसिकाः । सम्भवति युक्तिसिद्धत्वेऽनन्तानन्तप्रयोगाणामौपचारिकत्वकल्पनाया अन्याय्यत्वात् । सर्वानुगतचिदनुरोधिन्यस्तास्ताः क्रिया इति तु महतां चिच्छक्तानां वागूलीलाविजृम्भणमात्रम् । अथवा अस्तु तथा-का नो हानिः, सर्वेषामेवार्थजातानां चेतनत्वाभ्युपगमे जडत्वाभ्युपगमे-चोभयथाऽपि चेष्टाश्रयतायां निर्विवादत्वात् । तथा च सिद्धः कृधात्वर्थे भूधात्वर्थस्य भूधात्वर्थे चास्धात्वर्थस्यान्तर्भावः । एवमन्यत्रापि सर्वेषु धातुपूच्चावचानामर्थानां प्रवेशो द्रष्टव्यः । यथा चार्थजातेऽपि रसो रूढपदार्थः, तद्गर्भितं काष्ठं यौगिकपदार्थः, तद्गर्भितं तु शकटमन्यो यौगिक-

पदार्थः, तद्गर्भिता च चतुरङ्गिण्यित्येवमुच्चावचार्थानां सर्वेष्वर्थजातेषु प्रवेशः प्रतिपद्यते, तथैवेहापि शब्दजातेषु निर्विशेषं प्रतिपत्तव्यः । तत्र एकक्रियाविशिष्टे, एकाश्रितानेककक्रियाविशिष्टे उल्लिखितानुल्लिखितानेकाश्रितानेककक्रियाविशिष्टे धात्वर्थे धातुरकर्म्मक आख्यायते, न तदाख्यातं कर्म्मकारकमपेक्षते । क्रियाश्रयस्य निर्णीतत्वादाकांक्षानुदयात् । अत एव यत्राप्यनेकाश्रितानेककक्रियाविशिष्टो धात्वर्थः, तत्रापि गौणक्रियाश्रयस्य कर्म्मकारकस्य प्रसिद्धत्वेऽविशिष्टत्वे वा न तदपेक्षेति धातोरकर्म्मकत्वम् ।

अकर्मकधातुनिर्वचनम्

यथा मेघो वर्षतीत्यादौ पतनानुकूलचेष्टारूपे वर्षधात्वर्थे प्रकारीभूतपतनक्रियाश्रयस्य जलादेः सर्वजनीनत्वेन तद्विज्ञानार्थमाकांक्षा नोत्तिष्ठते, एवं 'स न संशृणुते मम' इत्यादौ श्रवणस्य विषयविशेषानुगतत्वं न विवक्ष्यते, अपि तु किञ्चिदपि न शृणोतीति कृत्वा श्रवणसामान्याभाव आस्थीयते । तस्मादर्थविशेषस्याविवक्षितत्वाच्छब्दसामान्यस्य च प्रसिद्धत्वान्नोत्तिष्ठते तत्राप्याकांक्षा, तस्मात्तत्राप्यकर्मको धातुः । एवमेवोल्लिखितकर्म्मके धात्वर्थेऽप्यत एवाकर्मकत्वम् । यथा अस्ति इत्यस्य सत्तां धत्ते, सत्तामनुवर्तते, सत्तामाश्रयतीति वार्थः, सर्वथापि वृत्त्यनुकूलचेष्टारूपधात्वर्थप्रकारीभूतवृत्तिक्रियाश्रयस्य सत्तापदार्थस्य धात्वर्थतावच्छेदककुक्षौ समुल्लिखितत्वान्न तदर्थमाकांक्षासमुत्थितः । यथा वा-जीवति इत्यस्य प्राणान् धत्ते इत्यर्थात्, नृत्यतीत्यस्य च गात्र विक्षिपतीत्यर्थादकर्मकत्वम्, वृत्त्यनुकूलचेष्टात्मकधात्वर्थान्तर्गतवृत्तिक्रियाश्रयस्य प्राणपदार्थस्य

जीवधात्वर्थे, स्पन्दनानुकूलचेष्टात्मकविक्षिपधात्वर्थान्तर्गतस्पन्दनक्रियाश्रयस्य गात्रपदार्थस्य नृतधात्वर्थे चान्तर्भावेन तयोराकांक्षानुदयात्। एवं लज्जते-आत्मानमपनुते,आत्मानं यस्य कस्यचिद् दृष्टेर्वा निवर्त्तयतीति वार्थः, जागर्ति-निद्रां क्षिणोति-आत्मानं निद्रायस्माद्वा निवर्त्तयतीति वार्थः, वर्द्धते-अङ्गानि वा सांयोगिकमर्थं योचिनोतीत्यर्थः, म्रियते प्राणांस्त्यजतीत्यर्थः-इत्येवमादिषु धात्वर्थे कर्मणामुल्लेख्यादकर्मकत्वमुन्नेयम।

अपर आह-परस्मात्प्रवर्तमाना या दृष्टिस्तन्मार्गतः स्वनिवृत्त्यनुकूला चेष्टा लज्जतेरर्थः, लज्जते, अपत्रपते-इत्याद्युक्तौ पश्यतः परस्य दृष्टिमार्गाद् यथा स्वयं निवर्त्तेत तथा चेष्टते इत्यर्थावगमात्। अथवा प्रेक्षमाणपरव्यक्तिविषयकस्वीयदृष्टिक्रियातः स्वनिवृत्त्यनुकूला चेष्टा लज्जतेरर्थः। लज्जते जिह्रेतीत्याद्युक्तौ पश्यन्तं परं प्रतिदर्शनव्यापारादयथा स्वयं निवर्त्तेत-तथा चेष्टते इत्यर्थावगमात्। तदित्थममुष्य लज्जतेरेकाश्रितानेककियाविशिष्टार्थकत्वादेवाकर्मकत्वं प्रतिपत्तव्यम्; निर्वृत्तिक्रियाया अपि तदनुकूलचेष्टाश्रयवृत्तित्वदर्शनात्। तथा तिष्ठतिरप्यत एवाकर्मकः-गमनव्यापारादयथा स्वयं निवर्त्तेत, तथा चेष्टते इत्यर्थाभ्युपगमान्निवृत्तितदनुकूलचेष्टयोरेकात्मवृत्तित्वात्। एवमेव जागर्त्यादीनामपि तेषां तेषां धातूनामत एवाकर्मकत्वं यथासम्भवमूहनीयम्। यथा पूर्वसंयोगपरित्यागेन पूर्वसंयोग्यधःप्रदेशानुयोगिकसंयोगानुकूलचेष्टायाः पतधात्वर्थतया पततीत्यस्य पूर्वसंयोगं परित्यज्य तदधःप्रदेशानुयोगिकसंयोगो यथा स्यात्तथा चेष्टते-इत्यर्थावगमादकर्मकत्वमिति दिक्॥

अथ यत्र त्वेकैव क्रिया धात्वर्थेऽन्तर्भवति, तत्र सुतरामकर्मकत्वम्, तदाश्रयस्य प्रथमकारकत्वेन द्वितीयकारकत्वानवकाशात्। यथाहुः--

विभेति शेते रमते विषीदति
प्रमोदते तुष्यति भाति रोचते।
हसत्यटत्युत्सहते प्रकम्पते
प्रकुप्यति द्वेष्टि जयत्यपीहते॥

इत्यादयो वृत्तिविशेषार्थाः। नैषां प्रायेण विवरणद्वारा स्फोटः शक्यः कर्तुमिति। अपरे तु न त्वेवैवंविधा अर्था येषां विवरणेन निर्वचनं नास्तीति, सन्ति चेहापि बहवो धात्वर्थाः, येषामन्यथाऽकर्मकत्वमादेष्टुं युज्यते इति यथायथमुन्नेयमित्याहुः। तदित्थं मुख्यक्रियाविशिष्टत्वमकर्मकत्वं सिद्धम्-वैशिष्ट्यञ्चात्र स्वाभिधायकत्व-स्वविशिष्टक्रियाविशिष्टक्रियानभिधायकत्वैतदुभयसम्बन्धेन। अत्रापि स्वप्रयोज्यत्वं स्वनिरूपितप्रकारताश्रयत्वं स्वाधिकरणावृत्तित्वमित्येते त्रयो वैशिष्ट्यनियामकसम्बन्धाः। पुनर्वैशिष्ट्यं तु स्वतादात्म्य,स्वाश्रयनिरूपितशक्त्यनिरूपकत्व-स्वाश्रयतापेक्षितार्थान्वयानवच्छिन्नत्वैतत्त्रितयसम्बन्धेन। तदेतत्तृतीयवैशिष्ट्यसमावेशाज्जीवति नृत्यत्यादीनाम्, मेघो वर्षति, स न संशृणुते, इत्यादीनां चाकर्मकत्वम्, तथा स्वाधिकरणावृत्तित्वनिवेशाल्लज्जतितिष्ठत्यादीनामपि तत्त्वं प्रतिपत्तव्यम्।

अथवा सकर्मकत्वप्रातिलोम्येनाकर्मकत्वं द्रष्टव्यम्। सकर्मकत्वं च मुख्यक्रियाविशिष्टत्वम्। कर्मशब्दस्य क्रियापरतयाऽपि लोकप्रसिद्धिदर्शनात्। वैशिष्ट्यं च स्वाभिधायकत्व-स्वविशिष्ट-क्रियाश्रयभूतार्थविशिष्टत्वेनेतदुभयसम्बन्धेन। क्रियायां स्ववैशिष्ट्यं च स्वनिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्व-स्ववैयधिकरण्येनेतदुभय-सम्बन्धेन। अर्थवैशिष्ट्यं तु धातौ स्वनिरूपितशक्तिमद्भिन्नत्व, स्वविषयकाकांक्षोत्थापकत्वेनेतदुभयसम्बन्धेन। यथा चाक्षुषज्ञानविषयी-करणं दृशधात्वर्थः। तत्र चाक्षुषज्ञानविषयीभवनानुकूलचेष्टा मुख्यक्रिया। तदभिधायकस्य दृशेस्तदर्थैधिकरणगौणक्रियासमवायि-चाक्षुषज्ञानविषयीभवदृष्टाद्यर्थानभिधायकत्वात्तद्विषयकाकांक्षोत्थाप-कत्वाच्च सकर्मत्वम्। मेघो वर्षति, स न संशृणुते तत, इत्यादावा-काक्षानुत्थापकत्वाज्जीवति नृत्यतीत्यादौ च कर्मणो धातुनिष्ठशक्ति-निरूपकत्वात्, लज्जते तिष्ठतीत्यादौ तु धातूपात्तक्रिययोः समानाधि-करण्यान्न सकर्मकत्वप्रसक्तिः। अथवा स्वाकांक्षोत्थापकत्व-स्वानभि-धायकत्वेनेतदुभयसम्बन्धेन कर्मकारकविशिष्टत्वं सकर्मकत्वं पार-माकार्यम्।

कारकलक्षणानि

कर्मकारकत्वं तु द्वितीयकारकत्वम्। तच्च धातुविशिष्ट-क्रियाश्रयत्वम्। क्रियायां धातुवैशिष्ट्यं तु स्ववाच्यत्व-स्ववाच्य-क्रियाविशिष्टत्वेनेतदुभयसम्बन्धेन। पुनर्वैशिष्ट्यं तु स्वनिष्ठविशेष्य-तानिरूपितप्रकारताश्रयत्व-स्वजन्यत्व, स्ववैयधिकरण्येनेतदुभय-

सम्बन्धेन। भवति हि घटं पश्यतीत्यादौ घट. कर्मकारकम्। चाक्षुषज्ञानविषयीभवनानुकूलचेष्टाया दृशधात्वर्थतया घटस्य निर्दिष्टै-तत्त्रितयसम्बन्धेन तादृशचेष्टाविशिष्टभवनक्रियाश्रयत्वाभ्युपगमात्। तत्र यद्यपि शाब्दबोधतो नागृहीतविशेषणा बुद्धिर्विशिष्टमवगाहते-इति न्यायादर्थतश्च चेष्टोद्देश्यत्वादस्या विषयीभवनक्रियाया एव चेष्टापेक्षया प्रथमोपस्थितेः प्राप्नोति, अथापि प्रयोज्यप्रयोजकभावा-पेक्षया प्रयोजकक्रियायाः प्रथमं बुद्ध्या ग्रहणादितरसर्वक्रियाः प्रति मुख्यत्वाच्च चेष्टाश्रयस्य कर्तृकारकस्य प्रथमकारकत्वमभ्युपगम्यते, ततो या विभक्तिः सा प्रथमाख्यया व्यवह्रियते। अथ प्रयोज्य-क्रियायाः प्रयोजकव्यापारोत्तरभाविन्या ग्रहणाद् उद्देश्यत्वेनेतर-प्रयोज्यक्रियापेक्षया मुख्यत्वाच्च तादृशभवनाद्याश्रयस्य कर्माख्यया-ख्यातस्य द्वितीयकारकत्वं प्रतिपद्यते, ततो या विभक्तिः सा द्वितीया-ख्या व्यवह्रियत इति बोध्यम्।

अथातः प्रथमकारकं निर्वक्तव्यमित्युच्यते। धातुविशिष्ट-क्रियाश्रयत्वं कर्तृकारकत्वम्। अत्र वैशिष्ट्यं तु स्ववाच्यत्व, स्व-वाच्यक्रियानिष्ठविशेष्यतानिरूपितप्रकारताश्रयत्व, एतदुभयसम्ब-न्धेन। धातूपात्तक्रियास्वनेकास्वपि स्वण्डशः शक्तेरेकस्याः प्रयोगा-नुरोधेन स्वीकारात्तत्तत्क्रियाणामगृहीतपरस्परसम्बन्धशक्तीनामाकां-क्षाभास्यसंसर्गाणां तत्र तत्र विशेष्यविशेषणभावव्यत्यासेऽभ्युपगम्य-माने विकल्पेनसाधनार्थकस्य पचेः शक्तिनिरूपकाणां विक्लित्ति-सिद्धिचेष्टानां यद्या यस्या विशेष्यत्वं तदा तदाश्रयस्य कर्तृत्वमभ्युप-

गन्तव्यम्। तथा च तन्दुलमोदनं पचति राम इत्यत्र चेष्टायाः विशेष्यतया विवक्षितत्वात्तदाश्रयस्य रामस्य कर्तृत्वं प्रतिपद्यते। तथा चेष्टाप्रयोज्यसिद्धेर्विशेष्यत्वविवक्षायां तदाश्रयस्यौदनस्य कर्तृत्वम् ओदनः पच्यते रामेणेत्यादौ। अत एवौदनपदात्प्रथमकारकवाचिनः प्रथमा, रामनिष्ठचेष्टाप्रयोज्य-विक्लित्तिसिद्ध्याश्रय ओदन इति तस्यार्थः। एवं तन्दुलं पच्यते रामेणेत्यत्रापि विक्लित्तेर्विशेष्यत्वविवक्षणात्तदाश्रयस्य तन्दुलस्य प्रथमकारकत्वं बोध्यम्, रामनिष्ठचेष्टाप्रयोज्यविक्लित्त्याश्रयस्तन्दुलमिति तदर्थः। अनयोरुभयोरप्यवयवयोः प्रयोजकक्रियायाश्चेष्टायाः प्रकारतयाभ्युपेताया आश्रयस्य रामस्य तृतीयकरकत्वमिति तृतीयया विभक्त्या तदुल्लेखः।

यत्र तु सिद्धिचेष्टयोर्विक्लित्तिचेष्टयोर्वा सामानाधिकरण्यविवक्षा, तत्र तस्यैव पचेरकर्मकत्वप्रतिपत्तिरिति तत्स्थलीयनियमानुसारेणात्रापि प्रयोगद्वैविध्यं द्रष्टव्यम् सिद्धेर्विशेष्यत्वे प्रकारीभूतायाः प्रयोजकक्रियायाश्चेष्टाया आश्रयस्यौदनस्य तृतीयकारकत्वम्। अतस्तस्य तृतीयया विभक्त्याभिनये स्वाप्रयोज्यत्व, स्वासामानाधिकरण्यसम्बन्धाभ्यामोदननिष्ठचेष्टाविशिष्टसिद्धेरन्यत्र प्रकारतया नेतुमनुपस्थानात्तस्या एव विशेष्यत्वमिति नान्यस्य प्रथमकारकत्वम्। अतस्तत्र न प्रथमया कस्याप्युल्लेख इति भावप्राधान्याद्भावप्रत्यय इत्युच्यते—पच्यते ओदनेनेति। ओदननिष्ठचेष्टाप्रयोज्या ओदननिष्ठा विक्लित्या सिद्धिरिति हि तदर्थः। यदा तु प्रयोजक क्रियायाश्चेष्टाया एव विशेष्यत्वं विवक्ष्यते, तदा तदाश्रस्यौदनस्य प्रथमकारकत्वमिति प्रथमया तदुल्लेखः—पच्यते ओदन इति, विक्लित्यनुकूलचेष्टाश्रय ओदन इति तदर्थः। इत्थमन्यत्राप्युच्चावचार्थव्यवस्थाधीना प्रयोगव्यवस्था द्रष्टव्या। इदं तु खलु निर्धारितं द्रष्टव्यम्—यस्यैव प्रथमकारकत्वलक्षणाक्रान्तिस्तद्वाचकादेव हि प्रथमा विभक्तिर्भवतीति। यस्य वा द्वितीयकारकत्वं तृतीयकारकत्वं वा ततस्त एव च द्वितीया तृतीया वा विभक्तिरिति। एवमेवोत्तरत्रापि चतुर्थकारकादौ चतुर्थ्यादिविभक्तिव्यवस्था समुन्नेया।

अथ तृतीयकारकत्वं करणत्वं नाम निरुच्यते। तच्च धातुविशिष्टक्रियाश्रयत्वम्। वैशिष्ट्यं च—स्ववाच्यक्रियाव्यापकत्वस्ववाच्यक्रियाव्यापकक्रियाप्रयोज्यत्वैतदुभयसम्बन्धेन। अन्नं भुङ्क्ते राम इत्यत्र यथान्नं गलादधः प्रविशेत् तथा चेष्टते इत्यर्थादन्ननिष्ठगलाधःप्रवेशक्रियानुकूलायाश्चेष्टाया भुज्धातुवाच्याया व्यापिका या हस्तक्रियामुखक्रियादन्तक्रियाजिह्वाक्रियाः तासां भुजधातुवाच्यरामचेष्टाव्यापकहस्तादिक्रियाप्रयोजकबलाधानरूपपरामनिष्ठक्रियाप्रयोज्यतया भुजधातुवैशिष्ट्यात्तदाश्रयाणां हस्तमुखदन्तजिह्वादीनां करणत्वम्।

इदमत्रावगन्तव्यम्—सर्वत्रैव हि तत्तत्क्रियानुकूला चेष्टा तत्तद्धात्वर्थो भवति, यथा चेष्टाविशिष्टचेष्टा पच्धात्वर्थः। वैशिष्ट्यं स्वतादात्म्य-स्वव्यधिकरणविक्लित्यसिद्धिक्रियाप्रयोजकत्वोभयसम्बन्धेन। चेष्टाविशिष्टचेष्टा भुजधात्वर्थः। वैशिष्ट्यं स्वतादात्म्य-स्वव्यधिकरणभक्षणानुकूलचेष्टाप्रयोजकत्वोभयसम्बन्धेन।

चेष्टाविशिष्टचेष्टा जिधात्वर्थः। वैशिष्ट्यं तु स्वतादात्म्य, स्वव्यधिकरणाभिभवनक्रियाप्रयोजकत्वोभयसम्बन्धेन। एवमन्यत्रापि सर्वत्र द्रष्टव्यम्।

तत्र च चेष्टा समुद्योगः। स च सामग्रीसंवलनरूपः। तथा हि-तन्दुलनिष्पत्तिविबलत्तिपूर्वकौदनसिद्धिक्रियानिरूपितजनकतावतीनां मुद्गीसमिदग्निस्थाल्यादिसमवेततत्तत्क्रियाणां स्वस्वकार्योन्मुखत्वं यथा स्यात्तथा बलप्रयोगः पचधातुप्रतिपाद्या चेष्टा। एवमन्ननिष्टगलाधःप्रवेशक्रियानिरूपितजनकतावतीनां हस्तमुखदन्तजिह्वादिसमवेततत्तत्क्रियाणां स्वस्वकार्योन्मुखत्वं यथा स्यात्तथा बलप्रयोगो भुजधातुप्रतिपाद्या चेष्टा। तथा शत्रुनिष्ठन्यूनीभवनक्रियानिरूपितजनकतावतां सामदानभेदादिप्रयोगाणां सेनासंग्रामशस्त्रादीनां प्रभावजादिशक्तीनां वा स्वस्वकार्यकारित्वं यथा स्यात्तथा बलप्रयोगो जिधातुप्रतिपाद्या चेष्टा। एवमन्यत्रापि यथासम्भवं भाव्यम्। तथा चैककार्योद्देश्येन समभिव्याहृतानामनेकासां विभिन्नाश्रयाणां क्रियाणामुद्भावका ये तत्तदनुगता बलविशेषास्तदाधायकबलप्रयोगस्यैकोद्देश्यकत्वादेकत्वेनाभिमतस्य स्वाहितबलाविनाभूततत्तत्क्रियाविशेषितस्य चेष्टात्वमिति चेष्टापदार्थतावच्छेदकावच्छिन्नानां तासां क्रियाणामाश्रयभूताः पदार्थाः प्रकृते करणशब्देन व्यपदिश्यन्ते। मुख्यबलप्रयोक्तृतया मुख्यकर्तुः समभिव्याहारेऽन्यबलाहितबलानां तेषां गौणकर्तृतया शब्दान्तरयोग्यत्वात्। अत्र च चेष्टापदार्थान्तर्गतः कर्तृनिष्ठो यत्किञ्चित्कार्यप्रयोजको बलप्रयोगः कृतिशब्देनोच्यते;

तथा चेष्टापदार्थान्तर्गता अन्याः सर्वा अपि विभिन्नाश्रयाः क्रियाः कृतिप्रयोज्यकार्यप्रयोजिका द्वारव्यापारशब्देन व्यवहर्तव्याः। तेषां च द्वारव्यापाराणां स्वप्रयोज्यत्वस्वप्रयोज्यप्रयोजकत्वोभयसम्बन्धेन कृतिवैशिष्ट्यं नानुगतरूपेण, अथवा तत्कृतिसमानोद्देश्यकत्वेनानुगतधर्मेणोपसंग्रहणाद्यथेच्छं न्यूनाधिकतारतम्येन तत्र तत्र धात्वाख्यातावच्छेदककुक्षौ प्रवेश इति तदाश्रयभूतानि करणकारकाण्यपि विवक्षानुरोधान्नियतानि भवन्तीति द्रष्टव्यम्। अतएव रामो बाणेन वालिनं जघान, वशिष्ठो मन्त्रेण वैरिणो जघान, त्रिनेत्रस्तृतीयनेत्रेण दर्पकं जघानेत्यादौ हन्धात्वर्थभूतायां स्वतादात्म्य—स्वव्यधिकरणप्राणपरित्यागक्रियाप्रयोजकत्वोभयसम्बन्धेन चेष्टाविशिष्टचेष्टायां यथेष्टमभिनिविष्टानां बाणमन्त्रनेत्रादिव्यापाराणामाश्रयभूतास्तत्र तत्र बाणादयः करणतया प्रतिपद्यन्ते। यत्तु स्वव्यधिकरणप्राणत्यागानुकूलचेष्टाया हनधात्वर्थत्वे—

असुर्या नाम ये लोका अन्धेन तमसावृताः।
तांस्ते प्रेत्याभिगच्छन्ति ये के चात्महनो जनाः॥

इत्यत्रोक्तोऽयमात्मघातो नोपपद्येतेति कश्चिदाक्षिपेत्-तन्न। तत्रैकस्यैवात्मनो यथा कथञ्चिदारोपितभेदविवक्षणात्, स्वव्यधिकरणक्रियाप्रयोजकचेष्टाया एव धात्वर्थत्वे धातोः सकर्मकत्वनियमात्कर्मापेक्षिधातुस्थलेऽवश्यं चेष्टाप्रयोज्यक्रियायाश्चेष्टायैर्यधिकरण्येन प्रतिपत्तव्यत्वात्। अत एव तदन्वयसिद्ध्यर्थमात्मानं हन्ति जालम इत्यात्मशब्दप्रयोगः समर्थितो भवति। यथा च भगवान् पराशरैः—

द्वावात्मानौ-अन्तरात्मा, शरीरात्मा च, अन्तरात्मा तत्कर्म करोति, येन शरीरात्मा सुखदुःखे अनुभवति, शरीरात्मा तत्कर्म करोति, येनान्तरात्मा सुखदुःखे अनुभवतीत्यात्मद्वैविध्यमाश्रित्य तादृशप्रयोगानुपपादयति। यदि तु प्रयोज्यक्रियाया एव विशेष्यत्वाभ्युपगमेन स्वव्यधिकरणचेष्टाप्रयोज्यः प्राणपरित्यागो हन्धात्वर्थो विवक्ष्यते, तदा प्राणगमनक्रियाप्रयोजकचेष्टारूपप्राणपरित्यागपदान्तर्गतगमनक्रियाश्रयस्य कर्म्मणो धातुनाभिहितत्वादकर्मकत्वेन (कर्मप्रत्ययेन। विशेष्यभूतप्राणपरित्यागाश्रयस्य प्रथमकारकत्वमिति ततः प्रथमा। अथ तादृशप्राणपरित्यागप्रयोजकत्वसामान्यादितरसर्वक्रियाणामाश्रयभूतास्तृतीयकारकत्वेन प्रतिपद्यन्ते इति ततः सर्वत्रतृतीया विभक्तिः, 'हन्यते दुर्बलं दैव पौरुषेण विपश्चिता' रामेण बाणेन हतो वाली' इत्यादि।

तादित्थं हन्यते हत इत्यनयोरपि हन्ति हतवानित्यादिवत्कर्त्रर्थ एव प्रत्ययो जायते, न तु कर्मणि। कर्मविभक्तिः, भावविभक्तिः, कर्मप्रयोगः भावप्रयोग इत्यादीनां प्रयोगभेदेन संज्ञामात्रतयोन्नेलक्ष्यत्वात्-इत्याहुः।

अपरे तु कर्तृत्वकर्मत्वकरणत्वादिवैलक्षण्येन प्रथमकारकत्वद्वितीयकारकत्वतृतीयकारकत्वादीनि परिष्कुर्वन्ति। तथाहि-स्वव्याचक्ष्यत्वस्वव्याचक्ष्ययत्किञ्चित्क्रियानिरूपितप्रकारतानाश्रयत्वोभयसम्बन्धेन धातुविशिष्टा या क्रिया तदाश्रयः प्रथमकारकः, ततः प्रथमा। [illegible]

देश्यत्वेनाभिमतत्वोभयसम्बन्धेन धातुविशिष्टा या क्रिया तदाश्रयो द्वितीयकारकः-ततो द्वितीया।

स्वव्याचक्ष्यत्व-स्वव्याचक्ष्ययत्किञ्चित्क्रियाप्रयोजकत्वेनाभिमतत्वोभयसम्बन्धेन धातुविशिष्टा या क्रिया तदाश्रयस्तृतीयकारकः ततस्तृतीया इत्यादि।

कर्तृत्वन्तु-धातुविशिष्टक्रियाश्रयत्वम्। तत्र वैशिष्ट्यं-स्ववाचक्ष्यत्व-स्ववाचक्ष्ययावत्क्रियाप्रयोजकत्वोभयसम्बन्धेन। तथा च हन्धात्वर्थे स्वव्यधिकरणत्व-स्वप्रयोजकत्वोभयसम्बन्धेन प्राणगमनक्रियानुकूलचेष्टाविशिष्टचेष्टाया विशेष्यत्वविवक्षया रामो वालिनं हन्तीति कर्तृप्रयोगे, स्वव्यधिकरणत्व-स्वप्रयोज्यत्व स्ववाचकवाच्यत्वैतत्त्रितयसम्बन्धेन चेष्टाविशिष्टचेष्टायाः प्राणगमनक्रियानुकूलचेष्टाया विशेष्यत्वविवक्षया रामेण वाली हन्यते इति कर्मप्रयोगे वा सर्वथापि रामस्यैव कर्तृत्वं न तु कर्मणोऽस्य वालिनोऽपि। नापि वा कर्मप्रयोगे रामस्य करणत्वम्। कर्तृप्रयोगे कर्तुः प्रथमान्तत्वम्, कर्तृविशेष्यकशाब्दबोधश्च। कर्मप्रयोगे तु कर्मणः प्रथमान्तत्वं कर्मविशेष्यकशाब्दबोधश्चेत्येवं विशेषसत्त्वेऽपि कर्तृत्वकर्मत्वस्वरूपे विशेषानुदयात्। कर्मकर्तृप्रयोगे तु पच्यते ओदन इत्यादौ धातुविशिष्टायाः कर्तृक्रियाया विक्लित्तिसिद्ध्यनुकूलचेष्टारूपायाः कर्मेतरनिष्ठत्वमनपेक्ष्य ओदनादिकर्मनिष्ठत्वविवक्षायामोदनादेरेव कर्तृत्वं कर्मत्वं चेति कर्तृप्रयोग एव कर्मवद् दृश्यते।

कर्मत्वं च धातुविशिष्टक्रियाविशिष्टक्रियाश्रयत्वम् । क्रियायां धातुवैशिष्ट्यनियामकसम्बन्धः स्वाश्रयत्व-स्वव्याप्यत्वोभयसम्बन्धः प्रागुक्तः । क्रियायां क्रियावैशिष्ट्यं तु स्वप्रयोज्यत्व-स्वोद्देश्यत्वैतदुभयसम्बन्धेन । चेष्टापदार्थान्तर्गतानामनेकेषां द्वारव्यापाराणां कृतिप्रयोज्यत्वेऽपि कृत्यनुद्देश्यत्वान्न तदाश्रयाणां करणानां कर्मत्वम् ।

करणत्वं तु धातुविशिष्टक्रियाविशिष्टक्रियाश्रयत्वम् । अत्राद्यः प्रथमो वैशिष्ट्यनियामकसम्बन्धः, द्वितीयस्तु स्वप्रयोज्यत्व-स्वोपयोगित्वोभयसम्बन्धः-स्वव्याप्यतावच्छेदकव्याप्यच्छिन्नत्वैतत्त्रितयरूपः । प्रेषितप्रयोज्यानां द्वारव्यापाराणां चैत्रेण चेष्टान्तरेणैव धातुवाच्यतया साध्यक्रियायां तेषां तेषां करणत्वम् । तदित्थं द्वारव्यापाराणां चेष्टान्तरेणैवाभेदसम्बन्धात् विशेष्यविशेषणभावस्यासत्त्वे तत्रायोग्यतया न करणसुखिनाख्यातप्रवृत्तिरित्यत एव करणकारकप्रत्ययिका आख्यातविभक्तयो नोपपद्यन्ते, किन्तु कर्तृक्रियायाः कर्मक्रियानिरूपितविशेष्यताश्रयत्वविवक्षायां कर्तृकारकप्रत्ययिका आख्यातविभक्तयो भवन्तीति स कर्तृप्रयोग इत्युच्यते, रामः ओदनं पचतीति यथा । अथ कर्मक्रियायाः कर्तृक्रियानिरूपितविशेष्यताश्रयत्वविवक्षायां कर्मकारकप्रत्ययिका आख्यातविभक्तयो भवन्तीति स कर्मप्रयोग इत्युच्यते ओदनः पच्यते रामेणेति यथा ।

यत्र तु कर्मक्रियायाः कर्तृक्रियया वा सामानाधिकरण्यं विवक्ष्यते, तत्र कर्तृक्रियायाः कर्मक्रियानिरूपितविशेषताश्रयत्व-

विवक्षायां कर्तृकारकप्रत्ययिकाः कर्मविभक्तयो भवन्तीति स कर्मकर्तृप्रयोग इत्युच्यते—ओदनः पच्यते इति यथा-ओदनः पच्यते रामेणेत्यत्रौदनः कर्मकारक इत्यतिरिक्तः कर्तृकारकोऽपेक्ष्यते रामेणेति । इह तु स ओदनः कर्तृकारक इति नातिरिक्तस्य कर्तृकारकस्य प्रयोगापेक्षेति विशेषः । यदि तु तत्र कर्मक्रियायाः कर्तृक्रियानिरूपितविशेष्यताश्रयत्वमाश्रीयते, तत्र कर्मकारकप्रत्ययिका आख्यातविभक्तयो भवन्तीति स भावप्रयोग इत्युच्यते ओदनेन पच्यते इति यथा । अत्र हि कर्मण एव कर्तृत्वात्तस्य च कर्तृस्तृतीयया नामविभक्त्याभिनीतत्वान्न पुनः प्रयोग उपयुज्यते-इत्यनपेक्षणात्कर्मनिष्ठभावनाविशेष्यकशाब्दबोधस्यैव तत्र सत्त्वात् । तथा च ओदनानिष्पत्तिचेष्टाप्रयोज्या विक्लित्तिसिद्धिरित्योदनेन पच्यते इत्यस्यार्थः ।

तदित्थं चतुर्द्धाख्यातप्रयोगो लभ्यते—राम ओदनं पचते इत्यन्यः-रामेण ओदन-पच्यते इत्यन्यः-ओदनः पच्यते इत्यन्यः-ओदनेन पच्यते इत्यन्यः—तत्र प्रथमे रामादिकर्तृमुख्यविशेष्यकः शाब्दबोधः । द्वितीये ओदनादिकर्ममुख्यविशेष्यकः शाब्दबोधः । तृतीये ओदनादिकर्तृमुख्यविशेष्यकः शाब्दबोधः । चतुर्थे कर्मक्रियामुख्यविशेष्यकः शाब्दबोध इत्यर्थः विशिष्य संसिद्धः ।

इदं तु बोध्यम्—चतुर्द्धा आख्यातप्रयोगो भवतीत्यधिकव्यवच्छेदो न तु न्यूनव्यवच्छेदोऽपि । न हि सर्वत्र चतुर्द्धा भवत्येवेति नियमः । अर्थविवक्षानुरोधेन हि शब्दप्रयोगो भवतीति यत्रैव

धात्वर्थबाधस्तत्रावश्यं सा विधा निवर्तते। तथा च केषांचित् पश्यतितिष्ठत्यादिधातूनां कर्तृप्रयोग एव न कर्मप्रयोगो नापि कर्मकर्तृप्रयोगः स्वसदृशः शक्तेरस्वीकारात्, अर्थबाधेन च कर्मणः कर्तृत्वविवक्षाया असम्भवात्। एवं यत्रैव प्रयोज्यप्रयोजकक्रिययोः स्वसदृशः शक्त्या धात्वर्थे प्रवेशस्तत्रैव कर्मप्रयोग इति बोध्यम्। तथा कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मकर्तृप्रयोगो भवति न तु कर्तृस्थभावकानां कर्तृस्थक्रियाणां चेति द्रष्टव्यम्।

एवमेव कर्मस्थभावकानां कर्मस्थक्रियाणामप्येककर्मणामेव कर्मकर्तरि भवति भावप्रयोगो न द्विकर्मणामित्येवं विषयविभागेन प्रयोगाः समुन्नेयाः। यथा भक्ता भवं पश्यन्ति इत्यन्यः। भक्तैर्भवो दृश्यते इत्यन्यः। भवो दर्शयते इत्यन्यः। भवेन दर्श्यते इति चान्यः। अत्र पश्यतेरेक एव कर्तृप्रयोगो न कर्म्मप्रयोगादिना चतुर्द्धापि। दृशेस्तु कर्मप्रयोगः—अथ दर्शः कर्मकर्तृप्रयोग इत्याद्यन्यत्रापि तत्र तत्र द्रष्टव्यम्। इयांस्तु विशेषः कर्मस्थभावक्रियास्थले कर्मकर्तृत्वे कर्मवत्प्रयोगः पच्यते ओदन इति यथा। कर्तृस्थभावक्रियास्थले तु कर्मकर्तृत्वे कर्तृवत्प्रयोगो दर्शयते भव इति यथा। अत्र दर्शयते भवो भक्तानिति कर्मापि निर्दिश्यते इति बोध्यम्।

यत्त्वत्र कश्चिद्भवो दर्शयते इति कर्मकर्तृप्रयोगं व्याकुर्वाणश्चतस्रोऽवस्था अभ्यूहति भक्ता भवं पश्यन्ति-इत्येका, चाक्षुषज्ञानविषय कुर्वन्तीत्यर्थः। तत्र प्रकृत्यर्थप्रेरणांशत्यागे—भवः पश्यति इत्येका। चाक्षुषज्ञानविषयो भवतीत्यर्थः। ततः कारितप्रयोगविवक्षायां—भक्ता भव दर्शयन्ति इत्येका। चाक्षुषज्ञानविषयं कुर्वन्तीत्यर्थः। ततः प्रत्ययार्थप्रेरणांशत्यागे दर्शयते भव इत्येका चाक्षुषज्ञानविषयो भवतीत्यर्थः इति।

तत्र द्वितीयकक्षायां पश्यति भव इति प्रयोगाख्यानं साहसमात्रम्। न लोके नापि वेदे कुत्रापि तदर्थं पश्यतेः प्रयोगं पश्यामः—नापि भवतां पाणिन्यादिमुनीनां तदनुशासनेन तत्सत्तामनुमिनुमः न हि पश्यत्यादिधातुषु धात्वर्थत्यागः सम्भवति दृशिगम्यादिवद् विशेष्यविशेषणव्यत्यासो वा, स्वसदृशः शक्तौ प्रयोगानुसारेणाभ्युपेतायामेव तदभ्युपगमात् नान्यत्रापि, तथा च पश्यतौ चाक्षुषज्ञानविषयीभवनस्य तदनुकूलचेष्टायाश्च नियतो विशेष्यविशेषणभाव इति विषयीभवनस्य विशेष्यत्वविवक्षायां तदर्थाभिधानक्षमस्य दृशेः प्रयोगः प्रवर्तते न त्वेवं पश्यतेरपीति द्वितीयकक्षायां दृश्यते भव इत्येवं प्रयोक्तुमौचित्त्ये पश्यति भव इत्याख्यानमस्थाने द्रष्टव्यम्।

एवमेव आरोहन्ति हस्तिनं हस्तिपकाः—आरोति हस्ती—आरोहयन्ति हस्तिनं हस्तिपकाः—आरोहयते हस्ती इत्यमेवमभ्यूहितासु चतसृषु कक्षासु आरोहति हस्तीति द्वितीया कक्षा कर्मकर्तृप्रयोगरूपा न त्वेव साधीयसी भवति। न्यग्भवने आरोहतेः प्रयोगासम्भवात्, अतएव कैयटेऽपि—यथा लुनाति केदारं देवदत्तः लूयते केदारः स्वयमेवेति केदारः कर्मकर्त्ता-तथा एयन्तेऽपि भवति-लावयते केदारः। कथमिति चेदुच्यते।

लुनातिस्तावद्द्विविधाभवनोपसर्जने द्विधाभावने वर्तते । लुनाति केदारं देवदत्तः । द्विधाभवन्तं द्विधाभावयतीत्यर्थः । यदा तु केदारस्य सौकर्य्यातिशयविवक्षायां देवदत्तस्य व्यापारो न विवक्ष्यते तदा द्विधाभवनमात्रे लुनातिर्वर्तते—अनेकार्थत्वाद्धातूनाम् । भिन्ना एव वा धातवो भिन्नार्थाः—साहश्यात्तु तत्त्वाध्यवसायः । तत्र द्विधाभवने केदारस्य कर्तुः—कर्मवत्कर्मणा तुल्यक्रिय इति कर्मकार्य्याण्यतिदिश्यन्ते । तेन लूयते केदारः स्वयमेवेत्यादयः प्रयोगा उपपद्यन्ते । अत्रापि स्वयमित्यस्य यदा आत्मना इत्यर्थः तदा आत्मापेक्षया कर्मत्वमस्येवेति लूयते केदारः इति तावदुदाहार्य्यम् । वृत्तिकाराणां तु स्वयमिति वचनं कर्त्रन्तरव्युदासपरं विज्ञेयम् ।

अथवा स्वयमित्यनेन करणत्वमात्मनः प्रतिपद्यते न तु कर्तृत्वम् । ततो यदा द्विधाभवनवृत्तेर्लुनातेर्देवदत्तादिप्रयोजकव्यापारे णिजुत्पद्यते तदा य एवार्थो लुनाति केदारं देवदत्त इति स एवार्थो लावयति केदारं देवदत्त इति, पुनः केदारस्य सौकर्य्यातिशयविवक्षायामविवक्षिते देवदत्तस्य व्यापारे द्विधाभवनमात्रवृत्तिर्लावयतिः संपद्यते । ततश्च य एवार्थो लूयते केदारः स्वयमेवेति स एव लावयते केदारः स्वयमेवेति । न च प्रयोज्यप्रयोजकभावनिवृत्तौ णिचो निवृत्तिः । उपायनिवृत्तावप्युपेयानिवर्तनात् , सिद्धशब्दव्युत्पत्तये हि प्रकृतिप्रत्ययविभागकल्पना आश्रीयते । लौकिके तु व्यवहारे सौकर्यमात्रविवक्षायां लावयते केदारं इति पयुज्यते

इत्यादिना णेरणाविति सूत्रोदाहरणप्रस्तावे द्वितीयकक्षायां लूयते केदार इत्याह न तु लुनाति केदारं इति ।

क्रियमाणं तु यत्कर्म स्वयमेव प्रसिध्यति ।
सूकरैः स्वैर्गुणैः कर्तुः कर्मकर्तेति तद्विदुः ॥

इत्यभियुक्तोक्तेर्ग्रामं गच्छतो रामस्य यदि कथञ्चित्सौकर्य्यात्सुखमायप्रतीत्या ग्रामः स्वयमेव सन्निहितो भवतीत्यभिवक्तुमीहेत तत्रायमवकाशः कर्मकर्तृप्रयोगस्य । तत्र च उत्तरदेशसंयोगानुकूलव्यापारवान् ग्राम इत्यर्थस्य उत्तरदेशसंयोगवान् ग्राम इत्यर्थस्य वा प्रतिपादकं ग्रामो गच्छतीति वाक्यं ततश्च रामवकल्पते-विवक्षितार्थविरुद्धार्थाभिधानात् । तस्मादर्थबाधान्नाकर्मकस्य गमेः प्रयोगः संभवतीति बोध्यम् । यत्तु तादृशप्रयोगस्य स्वारसिकत्वमभिवक्तुम्

आधिगच्छति शास्त्रार्थं स्मरति श्रद्दधाति वा ।
यत्कृपावशतस्तस्मै नमोऽस्तु गुरवे सदा ॥

इति श्लोकं प्रमाणीकृत्योदाहरति तत्तदर्थानभिज्ञानात् । नहि शास्त्रविषयः प्रकृते शास्त्रार्थस्यार्थः किन्तर्हि यः शास्त्रमर्थयते स शास्त्रार्थः भवति हि यथा फलार्थी वनं गच्छति धनार्थी राजद्वारं प्रविशति, विद्यार्थी गुरुमुपसर्पति-एवमेव शास्त्रार्थी गुरुकृपामाकांक्षते इति । स यथा त्रयाणां-फलार्थं समश्नुते-धनार्थः प्रार्थयते विद्यार्थीभिजानीते एवमेवायं शास्त्रार्थोऽपि गुरुकृपातोऽधिगच्छतीत्याह । तत्र यथा यस्तन्द्यान् पतिपद्यते फलमेषु उपपद्यते नान्यत्-

यनमेवार्थयते नान्यत्-विद्यामेवाभिजानीते नान्यत्-एवमेवेहापि शास्त्रमेवाधिगच्छति शास्त्रमेव स्मरति शास्त्रमेव श्रद्दधातीति सम्य-क्त्वात् प्रतिपद्यते। तस्मान्नायमकर्मकोऽधिगमधातुरिति दृशः प्रयोगा-भिमन्यानः कैयटादिर्भ्रमग्रस्त एव। मुनिभिः कुत्रापि तादृश-प्रयोगाणामनाख्यानात्।

यत्तु—णेरणौ यत्कर्म णौ चेत् सकर्त्ताऽनाध्याने इति भगवतः पाणिनेरनुशासनमवगमयत्येव तादृशः प्रयोगानित्याक्षिप्येत—तदपि नातीव रुचिरं भवति। भवति हि तदनुशासनं कर्तृ-स्थभावकानां कर्तृस्थक्रियाणां च धातूनां कर्मकर्तृत्वविवक्षायां दर्शयते भवः आरोहयते हस्तीति प्रयोगसम्भवे प्रमाणं नतु पश्यति भवः आरोहति हस्तीति प्रयोगसत्वेऽपि। कैयटोक्त्यनुसारेण तत्र पश्यति भवं भक्ताः इति-दृश्यते भवः स्वयमेवेति—दर्शयन्ति भवं भक्ता इति-दर्शयते भवः स्वयमेव इत्येवं कक्षाचतुष्टयस्योप-पादयितव्यत्वात्। वस्तुतस्तु भक्तैर्भवो दृश्यते इति-भवो दृश्यते इति-भक्तैर्भवो दर्श्यत इति-भवो दर्श्यते इतीत्थं कक्षाचतुष्टयं द्रष्टव्यम्।

यदि च प्रकारान्तरेणोदाहरणमुपनीयते-यथा पश्यन्ति भवं भक्ताः—आरोहन्ति हस्तिनं हस्तिपका इत्येषा प्रथमा कक्षा, ततः कर्मण एव प्रयोजकत्वविवक्षायां कारितप्रयोगे दर्शयति भवः—आरोहयति हस्तीति द्वितीया कक्षा। ततः प्रवर्तनांशत्यागे दर्शयते भवः आरो-हयते हस्तारि तृतीयस्यां कक्षायां सूत्रसमन्वय इति-ततोऽपि न पश्यति भवं भक्ताः—आरोहन्ति हस्तीत्यादयः प्रयोगा प्रसज्यन्ते।

नागेशमतप्रदर्शनम्

अत्रेदं द्रष्टव्यम्-अनेन कक्षात्रयप्रकारेणोदाहरणसमर्थनं नावकल्पते। अणौ कर्मणो भवस्य णौ कर्तृत्वाद्द्वितीयकक्षा-यामप्यात्मनेपदानिप्रसक्तेः। यत्तु अणौ यत्कर्म णौ चेदिति योगं विभज्य अणौ या क्रिया सैव चेत् एयन्तेनोच्यते इत्यर्था-भ्युपगमेन समानक्रियात्वाभावात्, णिजर्थस्याधिक्यात् तदतिप्र-सक्तिः परिहर्तुमिष्येत तत्तुच्छम। प्रथमकक्षायां प्रकृत्यर्थप्रेरणां-शसत्त्वात्तृतीयकक्षायां च तदसत्त्वात्समानक्रियत्वाभावेनोदाहरणे-ऽपि लक्षणाव्याप्तिप्रसंगात्। किञ्च सूत्रे योगविभागेन तादृशार्थकरण-मेव तावदप्रमाणम्-सूत्रस्वरसविरुद्धत्वात्। यद्यपि च भाष्यकारा योगविभागेन व्याचक्षते अथापि न ते कर्मशब्दस्य क्रियापरत्व-मभिप्रयन्ति। अपि तु-आरोहन्ति हस्तिनं हस्तिपकाः-आरुह्य-माणो हस्ती स्थलमारोहयति मनुष्यानित्यत्र पूर्ववाक्ये एयन्तभिन्न-स्यारोहतेः कर्मणो हस्तिनो मनुष्यादिकर्मान्तरवति वाक्ये कर्तृत्वा-दात्मनेपदमतिप्रसज्जते इति तदपवादार्थं प्रवर्तमानं-णेरात्मने-पदविधाने एयन्तस्यकर्मणस्तत्रोपलब्धिरितरथा हि सर्वप्रसङ्ग इत्ये-तद्वार्तिकं प्रत्याख्यातुं प्रौढिवादेन वार्तिकोक्तार्थं सूत्राक्षरतोऽव-गमयति। तथा च कैयटः-भवति च कर्मान्तरसद्भावेऽप्यणौ कर्म णौ कर्ता। भाष्यकारस्तु वाक्यभेदाश्रयेणैतमर्थं साधयति। णेरात्मने-पदं भवतीत्येकं वाक्यम्। ततोऽणौ यत्कर्म णौ चेदिति द्वितीयम्। अत्र वाक्ये यत्तदोर्नित्यसम्बन्धाद्यच्छब्देन तच्छब्द आक्षिप्यते-

कर्मान्तरस्य चानिर्देशात्कर्मत्वमेव संनिधानात् प्रतिनिर्दिश्यते-अणौ यत्कर्म णौ चेत्तत्कर्म-इति. प्रतिनिर्देशेन च कर्मान्तरस्यावृत्तिः क्रियते। न त्वणौ कर्मणो णौ कर्मत्वसद्भावः प्रतिपाद्यते। स कथमिति चायमाक्षेपान्तरेण तस्य कर्तृत्वप्रतिपादनाद् युगपदेककक्रियापेक्षया कर्मकर्तृत्वविरोधादेकस्य। यथेष्टं वाक्यशेषपरिकल्पनादणौ यत्कर्म णौ चेत्तदेव कर्मेत्येवकाराध्याहारात्कर्मान्तरानिवृत्तिलाभः इत्येवं व्याचष्टे।

ततश्च पूर्वोक्ते प्रत्युदाहरणे अणौ यत्कर्म हस्तिरूपं तदतिरिक्तस्य मनुष्यादेः कर्मणः सद्भावान्न तत्रात्मनेपदानिप्रसक्तिरित्यभिप्रायेण योगविभागस्य न तु क्रियापरत्वेन भवदुक्तार्थलाभाय सः। अयमालम्ब्य कक्षात्रयेण द्वितीयकक्षायां दर्शयति भव इत्यत्रात्मनेपदातिप्रसक्तेर्दुर्वारत्वात्स प्रकारो व्याहत एवेति बोध्यम।

अथोच्येत कर्मान्तरनिवृत्त्यभिप्रायेण भाष्योक्तार्थेऽपि द्वितीयकक्षायां भक्षादेः कर्मणः सत्त्वादेवात्मनेपदं न भविष्यतीत्यविशेषेति तत्र ब्रूमः।

अस्तु कथंचिद्, भाष्यविरोधस्तु भवति, भाष्यकारा हि यत्रणौ यं-कर्मकर्तारं भवति-तत्र कर्मकर्तृत्वात् सिद्धम्-कर्मकर्तृत्वात् सिद्धमिति चेद् यकृच्चिणोर्निवृत्यर्थं वचनम्-इत्येवमाचक्षाणा णेरणाविति सूत्रोदाहरणे कर्मयत्कर्मणा तुल्यक्रिय इत्यतिदेशादात्मनेपदसिद्धिमभिमन्यन्ते। तत्र यत्तं वं कक्षात्रयेणोपपादितमिदमेतत् सूत्रोदाहरणमभविष्यदवश्यं तर्हि तत्रात्मनेपदसिद्धेरेतदनुरोधेनत्वात् कर्मवत्त्वातिदेशेन तत्सिद्धिप्रतिपादन व्याहतमभविष्यत्। न च तत्रापि कर्मवद्भावः प्राप्नोति। दर्शयतो भवस्यारोहयतो हस्तिनश्च कर्मत्वाभावात् कर्मणा समानधातौ तुल्यक्रियत्वाभावात्। तस्मात् खल्वपि कक्षाचतुष्टयेन कक्षात्रयेण वोपपादितमेतत्सूत्रोदाहरणं नितान्तमशुद्धम।

वस्तुतस्तु कक्षात्रयेणोपपादितोदाहरणे द्वितीयकक्षायां प्रत्युदाहरणतयोपनीतायामेवोदाहरणं द्रष्टव्यम्। पश्यन्ति भवं भक्षाः—दर्शयते भवो भक्षानिति। आरोहन्ति हस्तिनं हस्तिपकाः—आरोहयते हस्ती हस्तिपकानिति। भाष्ये पश्यन्ति भृत्या राजानं—दर्शयते भृत्यान राजा इत्युदाहरणप्रदर्शनात्। आरोहन्ति हस्तिनं हस्तिपकाः—आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानिति शानचः प्रयोगाच्च। यत्तु कर्मान्तरसद्भावात्तत्रात्मनेपदं न प्रवर्तते इत्यभिमन्यसे तदेतद् भ्रमे पतितोऽसि। अण्यन्तस्य कर्मणस्तत्रोपलब्धिरित्येतद्वार्तिकव्याख्यानप्रत्याख्यानपरभाष्यार्थमजानानेनापि कैयटेन—"अस्मादेवोदाहरणाद् भाष्यकारस्यायमभिप्राय उच्यते—अण्यन्तावस्थायां ये कर्तृकर्मणी तद्व्यतिरिक्तकर्मान्तरसद्भावे आत्मनेपदं न भवति यथा स्थलमारोहयति मनुष्यानिति। इह त्वण्यन्तावस्थायां कर्तृणां भृत्यानां णौ कर्मत्वमिति भवत्येवात्मनेपदम्"

मतान्तरप्रदर्शनम् तत्खण्डनं च

अपरे त्वाहुः भाष्यकृतस्तद्वार्त्तिकमित्थं व्याचक्षते अण्यन्तस्य यत्कर्म यदा एयन्ते तदेव कर्म भवति तदात्मनेपद भवतीति''— तत्रेदं विचार्य्यते एयन्ते तदेव कर्म्म भवतीत्यत्र कियानंशो विधेयः कर्म भवतीति वा, तदेवेति वा, एयन्ते इति वा।

तत्र नाद्यः पक्षः अण्यन्तकर्मणो एयन्तावस्थायां कर्मत्वे प्रतिपिपादयिषिते अणौ यत्कर्म णौ चेत्स कर्ता इति कर्तृत्वाख्यानविरोधापत्तेः युगपदेककियापेक्षया एकस्य कर्मत्वकर्तृत्व विरोध इति कैयटेनाप्यभिहितत्वात्।

तस्मादस्तु द्वितीयः पक्ष इति चेत्तदपि न। अण्यन्तकर्मातिरिक्तकर्म्मणो एयन्तावस्थायामसत्त्वे प्रतिपिपादयिषिते पश्यन्ति भृत्या राजानं दर्शयते भृत्यान् राजेत्युदाहरणपराभिमभाष्यविरोधापत्तेरक्षरस्वारस्येन तदर्थालाभाच्च। कर्तृकर्मभिन्नस्य कर्म्मत्वं प्रतिषेद्धुमिष्टमिति सर्वथा कपोलकल्पनामूलकत्वाच्चास्य पक्षस्य।

तस्मात् पारिशेष्यादन्त्यः पक्षो वक्तव्यः तेन अण्यन्तस्य यत्कर्म तद् यदि एयन्ते भवत्येवेत्येवं वाक्यसमन्वयाभ्युपगमात्तस्याण्यन्तकर्मणो एयन्तेऽवस्थानमात्रमपेक्षितं भवति न तु कर्मत्वमपि तस्योद्देश्यतावच्छेदकत्वेऽपि विधेयतावच्छेदकत्वाभावात् अत एवाण्यन्तस्य कर्मणस्तत्रोपलब्धिरित्येतद्व्याख्येयाक्षरैकार्थ्यमप्युपपद्यते इतरथाऽधिकं कृतं स्यात्। अत एव च अणौ यत्कर्म णौ चेदित्येतद्योगविभागेन तद्वार्त्तिकगतार्थाभिमानेऽपि भाष्यकृतामुपपद्यते। इतरथा अणौ यत्कर्म णौ चेत्तत्कर्म्मेत्यधिकमनुच्यमानं योजनीयं स्यात्।

तस्मादल्पस्यैव पक्षस्य युक्तिसिद्धत्वाद् अण्यन्ते कर्मणः सतो एयन्ते स्थितिमात्रमपेक्ष्यते कर्मत्वं वा कर्तृत्वं वा नापेक्ष्यते इति पश्यन्ति राजानं, दर्शयते राजेत्युदाहरणे राज्ञ उभयत्र सत्वाद्दोष इति कश्चिद् ब्रूयात्तदपि न तथासति आरोहन्ति हस्तिनं हस्तिपकाः आरोहयमाणो हस्ती स्थलमारोहयति मनुष्यानिति भाष्योक्तप्रत्युदाहरणेऽप्यतिप्रसक्तेर्दुर्वारत्वात्।

स्वमतप्रदर्शनम्

तस्मात्पक्षत्रयेऽपि दोषदर्शनाद्भाष्यकृतश्च तद्विरुद्धव्यवहारदर्शनाद्विज्ञायते नात्र भाष्यकारः कैयटवत्कर्मशब्दस्य पारिभाषिककर्मपरत्वमभिप्रैति नापि वा दीक्षितवत् पारिभाषिकक्रियापरत्वम् कर्तरिकर्मव्यतिहारे इतिवत्कार्य्यापरपर्यालौकिककक्रियापरत्यमित्यभिसन्दध्मः। तथा च एयन्ताण्यन्तावस्थयोर्यत्रैकं कार्य्यं तत्राण्यन्तकर्मणो णौ कर्तृत्वे आत्मनेपदं द्रष्टव्यमित्यर्थः।

भवति हि तदेकं कार्य्यं साक्षात्कारो नाम यत्र भृत्याश्चक्षुर्व्यापारे प्रवृत्ताः राजा चानुचाक्षुरवस्थाने। यदि भृत्याश्चक्षुर्व्यापारं न कुर्य्युस्तत्तहि तत्रावतिष्ठमानोऽपि राजा न दृश्येत साक्षात्कारो नाम कार्य्यं वा न स्यात्। अथ यदि तत्र राजा नावतिष्ठेत तत्तर्हि चक्षुर्व्यापारं कुर्वाणा अपि भृत्या न पश्येयुः साक्षात्कारो नाम कार्य्यं

वा न स्यात् । तस्माद्राज्ञश्चक्षुर्विषयभवनकर्मणि प्रयोजका इमे भृत्याः। अथ भृत्यानां चक्षुर्विषयकरणकर्मणि प्रयोजकोऽयं राजा उभये चेतरेतरकर्मप्रयोजकाः सन्तः साक्षात्कारं नामैकं कर्म्म समर्थयन्ति । तत्र यदि भृत्यानां तत्प्रयोजकत्वं वक्तृविवक्षितं भवति तदानीं पश्यन्ति भृत्या राजानमित्याह अथ यदि राज्ञस्तत्प्रयोजकत्वं वक्तृविवक्षितं भवति तदानीं दर्शयते राजा भृत्यानित्याह । उभयथा च तदेवैकं कार्य्यं विपर्यीक्रिते, एकस्मिन्नेव कार्य्ये प्रयोजकयोर्द्वयोः सतोरेकैकविवक्षामात्रेण प्रयोगभेदात् । अत एव नियमेनात्र कर्तृकर्मणोर्व्यत्यासो भवति पश्यन्ति भवं भक्ताः, दर्शयते भवो भक्तानिति । आरोहन्ति हस्तिनं हस्तिपकाः—आरोहयते हस्ती हस्तिपकानिति च । यत्र तु कार्य्यभेदस्तत्र न नियमेनात्मनेपदम् । यथा दर्शयति राजा भृत्यान् कर्मफलम्—दर्शयति भवो भक्तान् स्वर्गद्वारम् । अन्यद्दृशिकर्म अन्यच्च दर्शयतिकर्म, आरोहयति हस्ती हस्तिपकान् स्थलम्—अन्यदारोहयतिकर्म तदित्थमर्थविवक्षाधीना प्रयोगभेदव्यवस्था द्रष्टव्या इत्यलं प्रसक्तानुप्रसक्तविचारेण ।

